श्रीगणेशायनमः विद्याधिपनमस्तुभ्यंविघ्नसंघंविनाशय प्रचंडरूपयमुच्चंबुद्धिंसि द्धिंविधेहिच १ यस्यलीलावशेनेदंजन्मास्थितिलयंव्रजेत् आनंदैकरसंवंदेतमुमास हितंशिवं २ अहमाद्यांमहाविद्यांवंदेनिऊसरस्वंती आनंदकंदलीसाक्षात्सद्योत्स्य फलप्रदां ३ अथाह्निकं तत्रप्रभातेउत्थायमातापितागुरुविष्टदेवतांनमस्कृत्वातद्दहः कर्तव्यंविचार्य ब्रह्मामुरारिस्त्रिपुरांतकश्चभानुःशशीभूमिसुतोबुधश्च गुरुश्चशुक्रः सहाभुजेनकुर्वंतुसर्वंममसुप्रभातं १ भृगुर्वसिष्टःक्रतुरंगिराश्चमनुःपुलस्त्यःपु लहश्चगौतमः रैभ्योमरीचिश्चवनश्चदक्षःकुर्वंतुः २ सनत्कुमारश्चसनंदनश्चसना तनोप्यासुरिपिंगलौच सप्तस्वराःसप्तरसातलानिकु० ३ संसार्णवाःसप्तकुलाचला श्चसप्तर्षयोद्वीपवनानिसप्त भूरादिकृत्वाभुवनानिसप्तकु० ४ पृथ्वीसगंधासर्

सास्तथापःस्पर्शीचवायुर्ज्वलनंचतेजः नभःसशब्दंमहतासहैवकु० ५ अग्नित्रयं त्रीण्यपिपुष्करणिनामयंत्रीणिवदानिविप्रोः रुद्रत्रिमंत्रास्त्रिपथाचगंगाएतानिदुःस्व प्नविनाशनानि ३ उत्थंप्रभातेपरमंपवित्रंपठेस्मरेद्वाश्रृणुयाच्चनित्यं दुःस्वप्ननाशं त्विहसुप्रभातंभवेच्चनित्यंभगवत्प्रसादात ६ पुण्यश्लोकोनलोराजापुण्यश्लोको युधिष्ठिरः पुण्यश्लोकाचवैदेहीपुण्यश्लोकोजनार्दनः ७ कर्कोटकस्यनागस्य दमयंत्यानलस्यच ऋतुपर्णस्यराज्ञर्षेः कीर्तनंकलिनाशनं ८ अश्वत्थामाबलि र्व्यासोहनुमांश्चविभीषणः कृपःपरशुरामश्चसप्तैतेचिरजीविनः ९ सप्तैतान्सं स्मरेन्नित्यंमार्कंडेयमथाष्टमं जीवेद्वर्षशतंसोपिसर्वव्याधिविवर्जितः १० अहल्या द्रौपदीसीतातारामंदोदरीतथा पंचैताःसंस्मरेन्नित्यंमहापातकनाशनं ११ ३

निप्रभातविधिः इतिमंत्रानुज्जपित्वाबहिर्गत्वादेवालयवल्मीकमूषकस्थलमार्गेश्मशा
नवापीकूपतडागवृक्षमूलास्थितेशौचावशिष्टकीदास्थिमिश्रव्यतिरिक्तांमृदंजलपात्रंच
गृहीत्वादशधृत्वा अग्निरित्यादितीर्थंश्मशानगोमयनदीयज्ञभूमिफाल[illegible]ष्टजलचिति
वल्मीकगिरिमस्तकदेवालयनदीतीरदर्भपुष्पशस्यस्थलसेव्यछायामार्गगोष्ठव्यतिरि
क्तैकांतस्थलेगुह्यभूमिमयत्नैस्तणेराछाद्यवस्त्रप्रावृतश्चेत्पृष्टतः केशबंधंविधायोप
वीतःएकवस्त्रश्चेद्दक्षिणकर्णेनिहितयज्ञोपवीतीमौनीवायुवार्यंकृत्वैवंमिगोतुलसीस्त्री
विप्रानभिमुखोनसोपानत्कोदिवासंध्ययोरुदङ्मुखोरात्रौदक्षिणमुखोमूत्रपुरीषेउत्सृ
ज्यलोष्टादिनागुह्यंप्रगृह्यनिरस्योत्थायपूर्वंनिहितमृज्जलपात्रंगृहीत्वाआर्द्रीम
लकमात्रमृज्जलेनचैकवारंलिंगंशौचंकुर्यान्मैथुनेत्वेतत्त्रिगुणंतद्रहितरेतोविसर्गेतु

द्विगुणं ततोवामहस्तेमृज्जलेश्वत्रिःसंशोध्याद्भिःप्रस्तितदधोधमात्र मृद्भिर्जलै
श्चपंचवारमपानेसंशोध्यपुनर्जलैरेवलिंगगुह्यंप्रक्षाल्यवामकरंतथैवत्रिःप्रक्षाल्यस्फि
क्शौचंचकृत्वावामकरमार्द्रामलकमात्रमृं[illegible]र्जलैश्चदशवारंप्रक्षाल्यहस्तद्वयंतावन्मा
त्राभिरेवमृद्भिर्जलैश्चसप्तवारंप्रक्षालयेत् मूत्रमात्रोत्सर्गेलिंगंपूर्ववदेकवारंत्रिवा
रंवाप्रक्षाल्यवामकरंतथैवत्रिःप्रक्षाल्यकरद्वयंतथैवद्विःप्रक्षालयेत् ततोयज्ञोपवीति
वासःपरिधायमाचम्यमुखउपविश्यपादावाकूर्परेबाहूचमृद्भिरद्भिश्चप्रक्षालय
त्येवंप्रक्षाल्यशौचावशिष्टमृदंप्रक्षालयेत् एतच्छौचंगृहस्थानांएतदर्धंस्त्रीणां व्रति
वनियतीनांतुद्विस्त्रिचतुर्गुणं अनुपनीताशक्तादीनांगंधलेपक्षयमात्रकरं सर्वेषांरा
त्यातुरत्वाध्वसुप्तानस्नानविहितशौचार्धेतदर्धंतदर्धानि एवंशौचंसंक्षाद्धारागंतू

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

पान्कृत्वाशुचौदेशेभूमिष्टपादौतजानुहस्तद्वयःप्राङ्मुखउदङ्मुखउपविश्यदक्षिणकरेण
शुद्धजलमादायकनिष्ठिकांगुष्ठौविहायेतरांसंहतोर्द्धांकृत्वाब्रह्मतीर्थेनकेशवनारायण
माधवेतित्रिभिर्नामभिःपीत्वाकरौप्रक्षाल्यसंस्पृष्टांगुलिमूलेनद्विःप्रमृज्यातोमुखं
संहत्यतिसृभिःपृथैमास्यमेवमुपस्पृशेत् अंगुष्ठेनप्रदेशिन्याघ्राणंपश्चादनेनरं अंगु
ष्ठानामिकाभ्यांचचक्षुःश्रोत्रेपुनःपुनः कनिष्ठिकांगुष्ठाभ्यांनाभिंहृदयंतुतलेनवै स
र्वाभिश्चशिरःपश्चाद्बाहूचाग्रेणसंस्पृशेत् तिसृभिस्तर्जनीमध्यमानामिकाभिः एवंहि
राचमनंकुर्यात् प्रतिपत्यैचदर्शीषष्टीचतुर्दश्यष्टमीनवमीद्वादशीत्रिजन्मनक्षत्रज
न्मदिनव्यतिपातसंक्रांतियज्ञव्रतोपवासश्राद्धदिनव्यतिरिक्तदिनेषुब्राह्मणोद्वादशां
गुलप्रमाणंक्षत्रविट्शूद्रास्तुनवषट्चतुरंगुलप्रमाणंकनिष्ठिकास्थूलमुदुंबरपृक्षा

३

पामार्गवेणुजंबुचूताशोकखदिरक्षीरकंटकीवृक्षान्यतमवृक्षोद्भवचूर्णीकृताग्रकाष्टमायु
र्वेलंयशोवर्चःप्रजाःपशूवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पतइत्यभिमंत्र्य अ
न्याद्यायशूद्रध्वंसोमोराजायमागमत् समेमुखंप्रमार्ष्टेनेयशासान्यभंगेनचेत्यनेन
मंत्रेणसर्वान्दंतान्संशोध्यतत्प्रक्षालनेभंक्त्वाशुचिदेशे स्यतादृशायेवजिह्वोल्लेखनि
कयाजिह्वांसंशोध्यसतिसंभवेदंतलग्ननिकारयज्जिह्वोल्लेखनिकांप्रक्षाल्यभक्षापरि
त्यज्यअमावास्यांतुद्वादशांगंडूषैरेवमुखंशोधयेत् कार्यःजिह्वोल्लेखस्तुसर्वदैवकार्येद्वाद
शांगंडूषान्कृत्वापूर्ववद्दंतकाष्ठाभावेप्रतिपदादिनिषिद्धदिनेचप्रदेशनीयजी
गुलितृणपर्णैर्द्वादशांगंडूषैर्वामुखंशोधयेत् ततोरात्रिवस्त्रंपरित्यज्यवस्त्रांतरंधृत्वामा
नसादिस्नानंकृत्वादेवगृहमागत्यतत्रसंमार्जनलेपनादिसंपाद्यदेवस्यनिर्माल्यमपसा

र्यंपूर्वंदिनावशिष्टपत्रादिनाभ्यर्च्यनमस्कुर्यात्।ततःस्वासनेउपविश्यस्वमूर्ध्निश्वेतपद्मे
विचिंत्यतस्मिन्पद्मेहृदिभुजंहृदिनेत्रंप्रसन्नवदनंगुरुंतन्नामग्रहणपूर्वंकंस्मरेत् ततोहंदे
वोनचान्योहंब्रह्मैवाहंनशोकभाक् सच्चिदानंदरूपोहंनित्यमुक्तःस्वभाववान् इतिदेव
गुरुदेवतात्मनोरैक्यंभावयित्वाप्रार्थयेत् त्रैलोक्यचैतन्यमयादिदेवश्रीनाथवि॥ श्लो ४
भवदाज्ञयैव प्रातःसमुत्थायतवप्रियार्थंसंसारयात्रामनुवर्तयिष्येइति शेषेन
नु॰ श्रीनाथविष्णोइत्यत्रचेशेशगोभोइत्यूहःकर्तव्यः ततःसुहृद्गोमयंगृहीत्वान
द्यादिसमीपंगत्वोद्धृतजलैर्मुखपाणिपादौचप्रक्षाल्याचम्यप्राणानायम्यदेशका
लौसंकीर्त्यममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःस्नानंकरिष्यइति
संकल्पस्नानंकुर्यात् अत्रेषःस्नानविधिरितिवचनात्यथाहनितथाप्रातरित्वि

चनाच्च प्रातःस्नानेप्यस्यविधेःप्राप्तौउदोगसूत्रेविशेषः अल्पत्वाद्धोमकालस्यमहत्वा
त्स्नानकर्मणः प्रातर्नतनुयात्स्नानेहोमलोपोविगर्हितइतिकात्यायनेनसाग्नेर्विस्तर
स्यनिषिद्धत्वात् व्यासःप्रातःस्नानेमंत्रवर्ज्यंमध्यान्हेमांत्रिकोविधिरित्येतद्वचनस्यापि
साग्निकविषयत्वातेनसंक्षिप्तमेवस्नानंकार्यंअभिषेकपावनादीनामनेकमंत्रसाध्या
नामेकद्विमंत्रैरनुष्ठानमित्येवात्रसंक्षेपइतिकेचिद्वैदिकमेवमाहुः ततश्चसाग्निः
पादप्रक्षालनादिगोमयविलेपनांतंविधायमुंचेतुमेनिअभिषिच्यनिमज्याचम्यदेवैः
प्रणवव्याहृतिगायत्रीभिःप्रतिमंत्रंपावयित्वामुंचेतुमेतिपुनरभिषिच्योत्तरेणघम
र्षणादीनामन्यतममावर्त्याचम्यनिर्गछेत् निरग्निकस्तुस्नानमनुतिष्ठेत्सकोचनि
मित्तस्यहोमस्याभावात् निरग्निनामध्यान्हस्नानविधिनासंपूर्णंप्रातःस्नानंकृत्वा

सेध्यावेदनास्त्वेमेगभूतेस्वकल्पोक्तेनर्पणेहुत्वासेध्यावेदनेकर्तव्यमितिसिद्धं प्रातर्मध्यान्हयोःस्नानेवानप्रस्थयतस्थयोः यतेस्त्रिषवणंस्नानंसप्तमुन्नतचारिणः उर्ध्वचसंध्येस्नातव्येब्राह्मणैश्चगृहश्रितैः तिसृष्वपिचसंध्यासुस्नातव्यंचतपस्विभिः प्रातःस्नायीभवेन्नित्यंमध्यस्नायीसदाभवेत् आचम्यप्रयतोनित्यंप्रातःस्नानंसमाचरेत् अस्नानस्यक्रियाःसर्वाःभवेनिस्फलायनः प्रातःसमाचरेत्स्नानंनक्तंनित्यमितिस्थिते इत्यादियोगयाज्ञवल्क्यैरवलंवेव्याघ्रपद्यकौर्मार्कउशनादिवचनेभ्योनित्यत्वेनप्राप्तंयदिचयथोक्तसमयप्रबोधाभावादिप्रयुक्तकालविलंबेनस्यात्तथासत्यस्यात्सर्वंसंध्यानुष्ठानसंभावनातदानिरग्निनापिसाग्निवद्युक्तितोल्यास्नानसंक्षेपवादरणीयः जटिलस्यशिरोरोगिणश्चाकंठमज्जनंस्नानंसभवत्योपितोच

MEMORIAL

ग्रहणादिनिमित्तंगंगादितिर्थेसंक्रांत्यादिपर्वनिमित्तंचफलप्रदंजटिलादीनामपिशिरस्कमेवास्त्रीशूद्रश्वसर्वत्रत्वंमीकुर्यात् ततआचम्यजलस्थएवस्नानोंगतर्पणंकुर्यात् तत्रदक्षः नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते तर्पणंतुनराचम्यअंगत्वेनविधीयते अतःस्नानांगतर्पणेष्वथंगवकाशे यत्तु पितृयज्ञस्तुतर्पणमित्युक्तंतस्यस्वतंत्रत्वेनोपदेशाच्चस्नानांगता नथातस्यब्रह्मयज्ञोपरिकालःकालभेदाच्चएष्वगनुष्ठानं वशिष्ठः नास्तिक्यभावाद्यःस्नातोननर्पयतिवैपितॄन् पिबंतितस्यनिःस्रावेपितरोस्यजलार्थिनइत्यतः स्नानांगतर्पणंकर्तव्यमेव नथाचमध्यान्हस्नानन्यतिरिक्तेनित्यादित्यतिरिक्तस्नानेस्नानोत्तरमविलंबेनैवांगभूतंतर्पणंकार्यं मध्यान्हस्नानेस्नानानंतरंसंध्यावंदनसूर्योपस्थानब्रह्मयज्ञानुष्ठानानंतरंतेत्रेणैवांगभूतेस्नानेचैवतर्पणमनुष्ठेयं तच्चका

लसंभवेवक्ष्यमाणप्रकारेण कार्यं॥असंभवेतुमोदादयोगणपतयस्तृप्यंतां। ब्र
ह्मादयोदेवास्तृ॰ गौतमादयोऋषयस्तृ॰ श्रीविष्णुस्तृप्यतामित्येकैकोंजलिः त
तोयज्ञोपवीतंकंठेकृत्वोदङ्मुखः ऊर्ध्वजानुस्तिरश्चोदक्षिणहस्ताग्रान्कुशान्कृत्वो
दगग्रान्वातन्मध्यभागेनप्राजापत्यतीर्थेनमनुष्यतर्पणंकुर्यात्॥सनकादयोमनु
ष्यास्तृप्यंतां।द्वावंजली। ततोपसव्यं कृत्वाद्विगुणैर्दर्भैः कव्यवाडनलादयोदेवपित
रस्तृप्यंतामित्यंजलित्रयं॰॥अथवाब्रह्मादयोयेदेवास्तान्देवांस्तर्पयामि।भूर्देवां
स्त॰ भुवर्देवांस्त॰ स्वर्देवांस्त॰ भूर्भुवःस्वर्देवांस्त॰ एकैकमंजलिंदेवतीर्थेनदत्वा॥
नीवीत्युदङ्मुखः सयवाभिरद्भिः कृष्णद्वैपायनादयोयेऋषयस्तानृषींस्त॰ भूऋ
षींस्त॰ भुवऋषींस्त॰ स्वऋषींस्त॰ भूर्भुवःस्वऋषींस्तर्पयामीतिद्वाद्वावंजलीऋ

षितीर्थेनदत्वाप्राचीनावीतिदक्षिणमुखः सतिलाभिरद्भिः सोमःपितृमान्यमोंगि
रस्वानग्निकव्यवाहनादयोयेपितरस्तांस्त॰ भूपितॄंस्त॰। भुवःपितॄंस्त॰ स्वःपितॄंस्त॰
भूर्भुवःस्वःपितॄंस्त॰ त्रींस्त्रीनंजलीन्पितृतीर्थेनदद्यादिति॥अयंतसंक्षेपस्तु॥
आब्रह्मस्तंबपर्यंतं जगदेतच्चराचरं॥मयादत्तेनतोयेननृप्यत्वेतच्चतुर्विधमि
तिदेवतर्पणविधिनांजलित्रयंदद्यादिति॥ततस्तीरमागत्य॥आग्निदग्धाश्चयेजी
वायेप्यदग्धाःकुलेमम॥भूमौदत्तेननृप्यंतुतृप्तायांतिपरांगतिमितिजलांजलिं
तीरेविनिक्षिप्य॥येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः॥तेगृण्हंतुमयाद
त्तंवस्त्रनिष्पीडनोदकमितिपरिधानीयंनिष्पीड्योपवीती॥यन्मयादूषितंतोयंश॥
रीरमलसंभवात्॥तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहमितियक्ष्मतर्पणंकृत्वा

जलादुत्तीर्यदेहेस्वयमेवशुष्केजातेकेशाजलेचनिःसृतेआर्द्रवासः नां
रुर्द्धदेशेननिष्कासनीयंशुचिःशुष्कंपरिधानीयवस्त्रंपरिधायतादृगेवोत्तरीयं
कृत्वाशुष्कभावेआर्द्रमेवसत्सवारमवधूयधृत्वाऽर्द्रवस्त्रंचतुर्गुणमुपरिदत्तं
स्थलेनिष्पीड्यमृद्गोरूकरोमक्षाल्यद्विराचम्यत्रिपुंड्रादिधारयेत्॥तथाचका
त्यायनः॥श्राद्धेयज्ञेजपेहोमेवैश्वदेवेसुरार्चने॥धृतत्रिपुंड्रःपूतात्मामृत्युंज
यतिमानवइतिअत्रपूतात्मेतिविशेषणात्त्रिपुंड्रपूतात्मनएवश्राद्धादिष्वधिका
रोनान्यस्य॥तथाचविप्राणांतन्मुख्यमित्युक्तंब्रह्मपुराणे॥त्रिपुंड्रधारणंमु
ख्यंविप्राणांश्रुतिचोदितं॥तस्माद्गृहस्थाश्रमिणामेवधार्यतेवैत्रिपुंड्रकं॥सर्वेषा
मेवभूतानामपवर्गफलप्रदं॥विप्राणांवेदविदुषांवेदांतज्ञानवेदिनां॥सिते

नमस्मनाकार्यंत्रिपुंड्रंपञ्चभूमवेरिति॥अतोमृदादिधारणात्स्मार्तीश्रौतंवि
भूतिधारणं।मुख्यंत्रैवर्णिकानां।विभूतिप्रकारस्त्वग्रेदर्शयिष्यते॥तांत्रिकाणां
तुगंगादिमृत्तिकयातर्जनीमध्यमानामिकान्यतमांगुल्याशिरोभालनाभि
हृत्कंठकूर्परदक्षिणवामपार्श्वदक्षिणबाहुस्कंधदक्षिणवामकर्णांधःपृष्ठ
स्तनेषुप्रणवेनयथाक्रमंशिरोतिरिक्तेषुनौदीपकमलकुमुददीपवेणुपत्र
जंबुपत्रदंडजंबूपत्रदीपाकारान्धृत्वाकुशासनेउपविश्यकुशोपग्रहःसंध्या
वंदनंकुर्यात्॥तद्यथाद्विराचम्य।विष्णु।विष्णु।विष्णुःपुंडरीकाक्षायनमइ
तिपुंडरीकाक्षंनत्वा॥उपात्तदुरितक्षय द्वारापरमेश्वरप्रीत्यर्थंप्रातःसंध्योपा
सनमहंकरिष्येइतिसंकल्प ॐकारस्यब्रह्माऋषिःदेवीगायत्रीछंदःपरमा

त्मारेवता सर्वकर्मारंभे विनियोगः। भूरादिमहाव्याहृतीनां प्रजापतिऋषिः गा
यत्र्युष्णिगनुष्टुप्छंदांसि अग्निवायुसूर्यादेवता अभिषेके विनियोगः॥तत्स
वितुरिति विश्वामित्रऋषिः गायत्रीछंदः सवितादेवता अभिषेके वि०॥ततो
दक्षिणेनपाणिनाकुशानादाय नद्यांनद्युत्तरतोयेगृहेचेद्वामकरस्थिततो
यैर्वक्ष्यमाणमंत्रैः प्रतिमंत्रमात्मानमभिषिंचेत्॥ॐ भूः पुनातु॥ॐ भुवःपु
नातु॥ॐ स्वः पु॰ ॐ भूर्भुवः स्वः पुनातु॥ॐ तत्सवितुर्वरेण्यं॰ पुनातु॥पृथ्वी
तिमंत्रस्य मेरुपृष्ठऋषिः सुतलं छंदः कूर्मोदेवता आसनेवि०॥पृथ्वीत्वया
धृतालोकादेवित्वंविष्णुनाधृता॥त्वंचधारयमांदेविपवित्रंकुरुचासनं॥अ
पसर्पंतुतेभूता येभूता भूमिसंस्थिताः॥येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञ

या॥अंगुष्ठाग्रेगोविंदायनमः। तर्जन्यांमहीधराय॰ मध्यमायांहृषीकेशाय॰ अ
नामिकायांत्रिविक्रमाय॰ कनिष्ठिकायांतु विष्णवेनमः करमध्येमाधवायन
मः करपृष्ठेजनार्दनाय॰॥ॐ भूः हृदयाय॰ ॐ भुवः शिरसेस्वाहा॥ॐ स्वः शि
खायैवषट्॥ॐ तत्सवितुर्वरेण्यं। कवचायहुं॥भर्गोदेवस्यधीमहि नेत्रत्र
यायवौषट्॥धियोयोनः प्रचोदयात् अस्त्रायफट्॥ॐ अकारं नाभौ॥
ॐ उकारं हृदये॥ॐ मकारं मूर्ध्नि॥ॐ भूः पादयोः॥ॐ भुवः जान्वोः॥ॐ स्वः
गुह्ये॥ॐ महः नाभौ॥ॐ जनः हृदये॥ॐ तपः कंठे॥ॐ सत्यं भ्रूललाटसं
धौ॥ॐ भूर्लोकं पादयोः॥ॐ भुवर्लोकं जान्वोः॥ॐ स्वर्लोकं गुह्यदेशे॥ॐ
महर्लोकं नाभौ॥ॐ जनलोकं हृदये॥ॐ तपोलोकं कंठदेशे॥ॐ सत्यलो

कंललाटसंधौ॥तकारं पादांगुष्ठयोः।सकारं गुल्फयोः।विकारं जंघयोः।तुकारं जा
न्वोः।वकारं ऊर्वोः।रेकारं गुदे।णिकारं लिंगे।यकारं कट्यां।भकारं नाभौ।गोका
रं उदरे।देकारं स्तनयोः।वकारं हृदये।स्यकारं कंठे।धीकारं मुखे।मकारं तालु
देशे।हिकारं नासिकाग्रे।धिकारं नेत्रयोः।योकारं भ्रुवोर्मध्ये।द्वितीयं योका
रं ललाटे।नकारं पूर्वमुखे।प्रकारं दक्षिणमुखे।चोकारं पश्चिममुखे।दकारं
उत्तरमुखे।याकारं मूर्ध्नि।व्यंजनतकारं सर्वव्यापीनं सर्वतोन्यसेत्॥तच्छिर
सि।सवितुरितिनेत्रयोः।वरेण्यं नासिकायां।भर्गोमुखे।देवस्यकंठे।धीम
हिहृदये।धियोनाभौ।योगुह्ये।नः जान्वोः।प्रचोदयात्पादयोः।आपोगुह्ये॥
ज्योतिश्चक्षुषी रसोवक्त्रे।अमृतं जानुनि।ब्रह्महृदये।भूः पादयोः।भुवः जान्वोः।

स्वर्ललाटे।ॐकारं मूर्ध्नि॥अथावाहनं॥गायत्रीं त्र्यक्षरां बालां साक्षसूत्रकमंडलुहस्तां
रक्तांरक्तवस्त्रांचतुर्वक्त्रांहंसवाहनसंस्थितां।चतुर्भुजां ऋग्वेदकृतोत्संगांब्रह्मा
णींब्रह्मदेवत्यांब्रह्मलोकनिवासिनीं।आवाहयाम्यहंदेवीमायांतींसूर्यमंडलात्।
आगच्छवरदेदेवित्र्यक्षरेब्रह्मवादिनि॥गायत्री छंदसांमातर्ब्रह्मयेननमोस्तुते॥पूर्व
वदोंकारादीनामापोज्योतिरित्यंतानामृष्यादीन्स्मृत्वाप्राणायामेविनियोगंस्म
रेत्।ततोॐनमोभगवतेवासुदेवायेतिमंत्रेणसमंताज्जलंक्षिपेत्।निमीलितन
यनोमौनीअंगुष्ठानामिकाकनिष्ठिकाभिर्नासिकांधृत्वा।ॐभूः ॐभुवः ॐस्वः
ॐमहः ॐजनः ॐतपः ॐसत्यं ॐ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥धियो
योनःप्रचोदयात्॥ॐआपोज्योतिरसोमृतंब्रह्मभूर्भुवःस्वरोमितिजपन्नाभौब्र

स्माणंरक्तवर्णंचतुर्भुजंध्यायन् वामनासापुटेनवायुंपूरयेत्। ततःपुनरपिभूरि
त्यादिपठन्हृदयेविष्णुंचतुर्भुजंश्यामवर्णंध्यायन्नासापुटद्वयंधृत्वावायुंकु
भयेत्॥ततःपुनरपिभूरित्यादिपठन्ललाटेश्वेतंत्रिनेत्रंरुद्रंध्यायन्दक्षिण
नासापुटेनतंवायुंरेचयेत्।अनेनप्रकारेणैकःप्राणायामोभवतिएवंत्रयः
प्राणायामःप्रतिसंध्यंकार्यः।अथवापूरकेवारत्रयपाठेनैकःप्राणायामः
कुंभकेवारत्रयपाठेनद्वितीयः।रेचकेवारत्रयपाठेनतृतीयःएवंप्राणाया
मत्रयंकृत्वाआचमनंकुर्यात्॥सूर्यश्चेतिनारायणऋषिःअनुष्टुप्छंदःसू
र्योदे॰आचमनेवि॰॥ॐसूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपा
पेभ्योरक्षंतां॥यद्रात्र्यापापमकार्षंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्ना १०

रात्रिस्तदवलुंपतुयत्किंचिद्दुरितंमयिइदमहंमामृतयोनौसूर्येज्योतिषिजुहोमि
स्वाहा॥अनेनमंत्रेणसकृदाचम्यस्मार्ताचमनंकुर्यात्॥ततःआपोहिष्ठेतिति
सृणांसिंधुद्वीपऋषिःगायत्रीछंदःआपोदेवतामार्जनेविनियोगः॥ॐआपो
हिष्ठामयोभुवस्तिरसिस्तानऊर्जेदधातनमहेरणायचक्षसेहृदये।
योवःशिवतमोरसःहृदये।तस्यमाजयतेहनःपादयोः।उशतीरिवमातरः शि
रसि।तस्माअरंगमामवइतिशिरसि।ॐयस्यक्षयायजिन्वथेतिहृदयेभ्मौज
लंप्रक्षिपेत्॥ॐआपोजनयथाचनइतिपुनःशिरसिमार्जयेत्॥सुमित्रियानइ
तिप्रजापतिऋषिःयजुःछंदःआपोदेवता।अंबुग्रहणेवि॰ॐसुमित्रियान
आपओषधयःसंतुइत्यनेनहस्तेजलंगृहीत्वा॥दुर्मित्रियाइत्यस्यप्रजापति

ऋ॰यजुः छं॰आपोदेवता॥अंबुप्रसेपेवि॰ॐदुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंच
वयंद्विष्मः।द्रुपदादिवेतिकोकिलराजपुत्रऋ॰अनुष्टुप्छं॰आपोदे॰जलावघ्राणेप्र
सेपेचवि॰ॐद्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव॥पूतंपवित्रेणेवाज्यमा
पःशुंधंतुमैनसः॥ऋतंचसत्यंचेत्यघमर्षणऋ॰अनुष्टु॰भाववृतोदे॰उदकप्रसे
पेवि॰ॐऋतंचसत्यंचाभीद्धात्तपसोध्यजायत॥ततोरात्र्यजायत॥ततःसमुद्रो
अर्णवःसमुद्रादर्णवादधिसंवत्सरोअजायत॥अहोरात्राणिविदधद्विश्वस्यमिष
तोवशी॥सूर्याचंद्रमसौधातायथापूर्वमकल्पयत्।दिवंचपृथिवींचांतरिक्षमथो
स्वःइत्येवंचकरस्थंजलेनासिकांतंनीत्वावामभागेभूमौक्षिपेत्॥ततःसकृदा
चम्य॥ॐकारस्यभूरादितिसृणांमाहाव्याहृतीनांगायत्र्यापूर्ववदृष्यादिअर्घ्य

दानेविनियोगंचस्मृत्वा॥ॐभूर्भुवःस्वरित्योंकारमहाव्याहृतिपूर्विकयागायत्र्यास्
र्षायत्रिरर्घ्यंदत्वादक्षिणपाणिनागृहीतजलेनासावादित्योब्रह्मेतिमंत्रेणात्मानंप
रिषिंचन्प्रदक्षिणंपरिक्रम्यद्विराचमेत्॥ततउत्थायभूम्यलग्नपादएकपादर्द्धपा
दास्वस्तिकाकारपाणिसूर्याभिमुखोवक्ष्यमाणैश्चतुर्भिर्मंत्रैःसूर्यमुपतिष्ठेत॥उ
द्वयमित्यस्यप्रस्कण्वऋ॰अनुष्टु॰सूर्योदे॰सूर्योपस्थानेवि॰।उदुत्यमित्यस्यप्रस्क
॰गायत्री॰सूर्योदे॰सूर्योपस्थानेवि॰।चित्रमितिकुत्स॰त्रिष्टुप्॰सूर्यो॰सूर्योप॰त
च्चक्षुरितिदध्यङ्ङाथर्वणऋ॰पुरउष्णिक्॰सूर्योदे॰सूर्योपि॰॥उद्वयंतमसस्परिस्वः
पश्यंतउत्तरं॥देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं॥१॥उदुत्यंजातवेदसंदेवंवहंति
केतवः॥दृशेविश्वायसूर्यं॥२॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥

DR. BHAU DAJI MEMORIAL

आप्राद्यावापृथिवीअंतरिक्षꣳसूर्यआत्माजगतस्तुषश्च॥३॥तच्चक्षुर्देवहितंपुरस्ता
च्छुक्रमुच्चरत्॥पश्येमशरदःशतंजीवेमशरदःशतꣳशृणुयामशरदःशतंप्रब्रवामश
रदःशतमदीनाःस्यामशरदःशतंभूयश्चशरदःशतात्॥४॥तेजोसीतिपरमेष्ठी प्रजा
पतिऋषिःगायत्री॰ आज्यंदे॰गायत्र्यावाहनेवि॰॥ॐतेजोसिशुक्रमस्यमृतमसि
धामनामासिप्रियंदेवानामनाधृष्टंदेवयजनमसि॥तुरीयपदस्यविमलऋषिःगा
यत्री॰परमात्मादे॰गायत्र्युपस्थानेवि॰ गायत्र्यस्येकपदीद्विपदीत्रिपदीचतुष्पद्यपदसि
नहिपद्यसे॥नमस्तेतुरीयाय दर्शताय पदाय परोरजसेसावदोम्॥नमस्कारः॥ॐ
भूःहृदयायनमइत्यादिपूर्वोक्तहृदयादिन्यासंविधाय॥ॐकारमहाव्याहृतिगायत्री
णांपूर्ववदृष्यादिस्मृत्वा॥अग्निर्मुखंब्रह्मशिरःरुद्रःशिखाविष्णुहृदयंसांख्याय

---

३ छिन्नपादांगायत्रींजपंकुर्वंतियेद्विजाः॥अधोमुखास्तुतिष्ठंतिकल्पकोटिशतैरपि॥१॥ ३

नंगोत्रंसर्वपापक्षयार्थेजपेविनियोगइतिस्मरेत्॥ततोध्यानं॥मुक्ताविद्रुमहेमनीलधव
लच्छायैर्मुखैःपंचभिर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्त्वार्थवर्णात्मिकां॥गायत्रींवरदाभ
यांकुशकशांशूलंकपालंगुणंशंखंचक्रमथारविंदयुगुलंहस्तैर्वहंतींभजे॥१॥ओंछिन्नपा
दांगायत्रींब्रह्महत्यांव्यपोहति॥अछिन्नपादागायत्रीब्रह्महत्यांप्रयछतीतियोगियाज्ञ
वल्क्यवचनात्॥तत्सवितुर्देवस्यवरणीयंतेजोधीमहिध्यायेम।योस्माकंकर्माणिप्रेरय
तीतिगायत्र्यामंत्रार्थंस्मृत्वाअष्टोत्तरसहस्रंअष्टोत्तरशतंअष्टाविंशतिवारंगायत्रीं ४
जप्त्वापुनःषडंगन्यासंकृत्वा॥विश्वतश्चक्षुरितिविश्वकर्माभौवनऋ॰त्रिष्टुप्॰विश्व
कर्मादे॰सूर्यप्रदक्षिणायांवि॰॥ॐविश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतवि
श्वतस्पात्॥संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः इत्यनेनप्रदक्षिणं

१३ कुर्यात्॥ एकंचक्रंरथे यस्यदिव्यं कनकभूषितं॥ समेभवतुसुप्रीतः पद्महस्तोदिवाकरः इ
त्यनेनसूर्यंनमस्कुर्यात्॥ देवागातुविदइतिमनस्पतिऋ॰विराट्छं॰वातोदे॰जपविसर्ज
नेवि॰ॐदेवागातुविदेागातुवित्वागातुमित॥ मनसस्पतइमंयज्ञंॐस्वाहावातेधाइत्यने
नाष्टोत्तरशतसंख्याकेनगायत्रीजपेनप्रातःसंध्यांगभूतेनश्रीभगवान्ब्रह्मस्वरूपीस
वितापीयतां॥ ततःसंध्यांप्रार्थयेत्॥ यदक्षरपदभ्रष्टंमात्राहीनंतुयद्भवेत्॥ तत्सर्वंक्षम्य
तांदेविकृपयप्रियवादिनी॥ ततःसंध्याविसर्जनं॥ उत्तमेशिखरेजाताभूम्यांपर्वतमू
र्धनि॥ ब्राह्मणेभ्योह्यनुज्ञातागच्छदेवियथासुख मितिसवित्रेनमः॥ पूर्वेइंद्रायनमः॥ १३
अग्नयेअग्नये॰॥ दक्षिणेयमाय॰नैऋत्यांनैर्ऋतये॰पश्चिमेवरुणाय॰वायव्यांवायवे॰
उत्तरेकुबेराय॰ईशान्यांईशानाय॰ऊर्ध्वायेदिवेब्रह्मणे॰अवाच्येदिवेअनंताय॰॥ न

मःसवित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थितिनाशहेतवे॥ त्रयीमयायत्रिगुणात्मधारिणेवि
रिंचिनारायणशंकरात्मने॥ आकाशात्पतितंतोयंयथागच्छतिसागरं॥ सर्वदेवनमस्का
रंकेशवंप्रतिगच्छति॥ इतिप्रातःसंध्या॥ ॥अथसंध्याकाललोपेप्रायश्चितं॥ चतुर्थार्घं
प्रकुर्वीतशिरवाव्याहृतिसंपुटादिति॥ अथगायत्रीतर्पणं॥ आद्येत्यादि॥ सर्वव्यापिनःस
वितुःप्रीतयेगायत्रीतर्पणमहंकरिष्ये॥ तत्सवितुरितिऋष्यादिपूर्ववत्॥ तर्पणेवि॰॥ ततःष
डंगन्यासः॥ ॐभूर्भुवःस्वःपुरुषं ऋग्यजुःसाममयमंडलांतर्गतंसवितारमावाहयिष्ये॥
ॐभूःपुरुषंऋग्वेदायनमस्तर्पयामि॥ ॐभुवःपुरुषंयजुर्वेदाय॰ॐस्वःपुरुषंसामवे
दाय॰ॐमहःपुरुषंअथर्ववेदाय॰ॐजनःपुरुषंइतिहासपुराणाय॰ॐतपःपुरुषंस
र्वागमाय॰ॐसत्यंसर्वलोकाय॰ॐभूर्भुवःस्वःपुरुषमंडलांतायनमःसवितारंतर्पयामि॥

ॐभूःएकपदागायत्र्यैनम॰ॐभुवःद्विपदागायत्र्यै॰ॐस्वःत्रिपदागायत्र्यै॰ॐभूर्भुवःस्वश्च
तुष्पदागायत्र्यै॰ॐउषसेनमस्त॰गायत्र्यैनम॰सावित्र्यै॰सरस्वत्यै॰ॐवेदमात्रे॰ॐपृथिव्यै॰
ॐजयायै॰ॐसांकृत्यै॰ॐकौशिन्यै॰ॐसर्वपराजित्यै॰ॐसहस्रमूर्त्यै॰ॐनंतानंतमूर्त्यै॰
ॐअनंतानंतमूर्त्यै॰॥मंत्रैरेभिस्तुयोनित्यंचतुर्विंशतिसंमितैःगायत्रींतर्पयेत्तेनतर्पितंस
चराचरमितिगायत्रीतर्पणं।ततोगुर्वादीनभिवादयेत्॥आद्यौचेतुगृह्यकारिकायांवि
शेषः॥संध्यायांमनसाशक्त्यामंत्रानुच्चारयेद्द्विजः॥प्राणायामंविनासर्वंयद्यप्राणंनि
यम्यच॥मार्जनादिभवेत्सर्वंविहमार्जनं॥उच्चार्यवाचागायत्रींदद्यादर्घ्यांजलीनपि॥
अष्टाविंशतिकृत्वोत्रगायत्रीमनसाजपेदिति॥तथान्यत्रापि।अर्घ्यंतामानसीसंध्या १४
प्राणायामविवर्जिता॥संध्यायाःफलमाहयाज्ञवल्क्यः॥निशायांवादिवावापियदज्ञा

नकृतंभवेत्॥त्रैकाल्यसंध्याकरणात्तत्सर्वंप्रविनश्यति॥यमोपि॥यदह्नाकुरुतेपापंकर्म
णामनसागिरा॥आसीनःपश्चिमांसंध्यांप्राणायामैर्निहंतितत्॥एवंशातातपोपि॥अनृतं
मध्यगंधंचदिवामैथुनमेवच।पुनातिवृषलान्नंचसंध्याबहिरुपासितेति॥ ॥अथ
प्रातर्होमः॥सचसूर्योदयात्पूर्वंअग्नेःपश्चादुपविश्योपयमनकुशान्समिधस्तिस्रःपा
लाशयःमणिकवारियवादिहोमद्रव्यमग्नेरुत्तरतःप्रांचमासाद्यप्राणानायम्यदेशका
लौस्मृत्वाश्रीपरमेश्वरप्रीत्यर्थंप्रातर्होमंकरिष्येइतिसंकल्प्य॥सूर्यायस्वाहाप्रजापत
येस्वाहेत्यवयोर्मंत्रयोःप्रायोयुगावाक्रषयःगायत्रीत्रिष्टुप्छंदांसीक्रमेणसूर्यप्रजाप
तीदेवतेप्रातर्होमेवि॰।तत्रसूर्यंप्रजापतिंतंडुलैर्वायवैर्वायस्येइतिदेवताभिध्यानंकृत्वो
पयमनकुशानादायतिष्ठन्समिधोन्याधायोदकेनपर्युक्ष्यदक्षिणंजानुनिपात्यहृदिस

व्यहस्तंप्रसारितांगुलिंनिधायहृदयशपर्वपूरकेनतंडुलयवानामन्यतमेनहस्तेनैवस्वंगारि
णिस्वर्चिषिवन्हौमध्यप्रदेशेदेवतांध्यायञ्जुहुयात्।ॐसूर्यायस्वाहाइदंसूर्यायेतित्या
गांतेहविःप्रक्षेपः॥तदुत्तरतःप्रजापतयेस्वाहाइदंप्रजापतयेइति॥सर्वत्रप्रजापतियागो
मनसैव।स्वाहाकारस्तुश्राव्यः॥ऋष्यादिस्मृत्वाविष्णाडित्यनुवाकेनसूर्यमुपतिष्ठेत्॥विष्णाडि
त्यस्यविष्णाडूसूर्यऋषिः जगतीछं॰सूर्योदे॰उदुत्यमितित्रयाणांप्रस्कण्व॰गायत्री॰सू
र्योदे॰तंप्रत्यथावत्सारःकश्यप॰जगती॰सू॰अयंवेनइत्यस्यवेनऋ॰त्रिष्टुप्॰सू॰चित्र
मित्यस्यकुत्सआंगिरस॰त्रिष्टुप्॰सूर्योदे॰आनइत्यस्यअगस्त्य॰॥त्रिष्टुप्॰सूर्यो॰यदद्ये १५
त्यस्यश्रुतकक्षश्रुतकक्षावृषीगायत्री॰सूर्योदे॰तरणिरित्यस्यप्रस्कण्व॰त्रिष्टुप्॰सूर्योदे॰
तत्सूर्यस्येतिहृद्योःकुत्सऋ॰त्रिष्टुप्॰सू॰बण्महानितिहृद्योःजमदग्नि॰प्रथमयाबृह॰हि

तीयायाःसतोबृहती॰सू॰श्रायंतइवेत्यस्यनृमेधऋ॰बृह॰सू॰आद्यादेवाइत्यस्यकु॰गाय॰
सू॰आकृष्णेनेतिहिरण्यस्तुपआंगिरस॰त्रिष्टुप्॰सूर्योदे॰सर्वेषांसूर्योपस्थानेवि॰
॥ॐविष्णाडूबृहत्सिवतुइत्यादिसमंजाथेइत्यंततंप्रत्यथायंवेनश्चित्रंदेवानामिति
प्रतीकग्रहणस्यफक्किकांपरित्यज्यतंप्रत्यथापूर्वथेत्याद्येवभुवनानिपश्यन्नित्यं
तदंतंपठेत्॥इत्थमुपासनहोमंकृत्वोपासनाग्निजप्तस्मवामहस्तेधृत्वाथदक्षिणहस्तेना
छाद्यआग्निरितिभस्मजलमितिभस्मव्योमेतिभस्मसर्वंहवाइतिभस्ममनएतानिचक्षूं
षिभस्मानीतिमंत्रेणत्रिरभिमंत्र्य।त्र्यंबकमितिमंत्रेणजलेनमिश्रयित्वाऽनामिकामध्य
मातर्जनीमिलितलाग्रहन्नाभिकंठदक्षिणबाहुमूलमध्यमणिबंधवामबाहुमूलमध्य
मणिबंधपृष्ठशिरःस्थानेषुप्रणवेनविन्यस्यात्॥यत्सादयोप्येवमेवोर्ध्वपुंड्रांतेऽग्निहोत्रा

द्विजंभस्मविभृयुः॥प्रातर्होमानंतरंदेवपूजा॥विधायदेवतापूजांप्रातर्होमादनंतरमितिमरीच्यु
क्तेः॥देवकार्यंततःकृत्वाकुरुमंगलवीक्षणमितिदक्षोक्तेश्च॥ततःहोमादनंतरं॥मंगलंआदर्शादि॥
हारीतस्तु॥कुर्वीतदेवतापूजांजपयज्ञादनंतरमित्याह॥जपयज्ञोब्रह्मयज्ञः॥कूर्मपुराणे॥माध्या
ह्निकंस्नानंविधायदेवपूजोक्ता॥निष्पीड्यस्नानवस्त्रंवैसमाच्यम्यचवाग्यतः॥स्वैर्मंत्रैरर्चयेद्
देवान्पत्रैःपुष्पैस्तथांबुभिरिति॥एतत्प्रकारस्तुतर्पणोत्तरंवक्ष्यते॥ततोविष्वक्सेनशिवगणेशसू
र्यदुर्गास्तत्तत्प्रतिमासुविष्वक्सेनशिवगणेशसूर्यदुर्गाभ्योनमइतिश्लिष्टमंत्रेणसहस्रशीर्षेतिषो
डशर्चावा॥आवाहनासनपाद्यार्घ्याचमनीयस्नानवस्त्रयज्ञोपवीतचंदनपुष्पधूपदीपनैवे
द्यप्रदक्षिणानमस्कारपुष्पांजल्यारव्यषोडशोपचारैरभ्यर्च्यगुरूंश्चसंपूज्यकिंचिद्ब्राह्मणा
यदत्त्वा॥दर्पणमणिघृताग्निदूर्वामंगलद्रव्याणिदृष्ट्वा॥अध्ययनाध्यापनाभ्यांवेदमभ्यस्यकुटुं

बरक्षणार्थमनिषिद्धजीविकयाधनमर्जयित्वामध्यान्हेप्रतियत्नेकादशीरविसोमभृगुवार
भरणीकृत्तिकामघानक्षत्रमन्वादियुगादिव्यतिरिक्ततिथौमृत्तिकास्नानादिकुर्यात्॥तत्राष्टभ्य
विभक्तस्यदिवसस्यचतुर्थभागेमृद्गोमयकुशातिलाक्षतादूर्वापामार्गपुष्पवस्त्रयुग्मोदकपा
त्रादीनिस्नानोपकरणान्यारायमहानदीदेवखाततडागाद्युदकाश्रयंगत्वाहस्तेनतंप्रक्षा
ल्यभूमौमृद्गोमयादीनिपृथक्पृथक्स्थापयेत्॥ततोमृत्तिकांत्रेधाविभज्यमहांतंभागमादा
यजलाशयाद्बहिरुपविश्यतस्माद्भागादामलकमात्रांमृदमादायाद्भिःक्लिन्नांकृत्वातेनपाणि
पादंप्रक्षाल्यकुशहस्तोबद्धशिखीसवीएकवासाआचमेत्॥ततःस्त्रिःप्राणानायम्यदेशकालौसं
कीर्त्यापात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंमध्यान्हस्नानमहंकरिष्येइतियवकुशजलैःसंक
ल्प्य॥कृत्रिमेजलाशयेसेतुकूपव्यतिरिक्तेस्नानतर्पणांपंचमृत्सिंडानुद्धरेत्॥सेतोस्त्रीन्मृत्सिंडा

नसुप्रातरेकूपेत्रीन्मृत्पिंडान्अप्रातरेत्रीन्जलपूर्णान्कलशानुद्धरेत्॥ततः उरुꣳहीतिमंत्र
स्यशुनःशेपऋ॰त्रिष्टुप्॰वरुणोदे॰तोयाभिमंत्रणेवि॰येतेशतमितिविश्वामित्र॰त्रिष्टुप्॰वरुणो
दे॰तोयावर्तनेवि॰॥उरुꣳहीतितोयमामंत्र्य।येतेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहो
तः॥तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काइतिप्रदक्षिणंजलमावर्तयेत्॥सुमि
त्रियादुर्मित्रियाइत्यनयोःप्रजापत्यश्विसरस्वतीद्राऋषयःगायत्रीत्रिष्टुभौछंदसी॥आपोꣳ
॰यथाक्रममंजलिग्रहणेद्वेष्यंप्रत्युदकंनिषिंचनेविनि॰ॐसुमित्रियानꣳआपओषधयःसं
तुइत्यंजलिनाजलंगृहीत्वा।दुर्मित्रियास्तस्मैसंतुयोस्मांद्वेष्टियंचवयंद्विष्मइतिद्वेष्यंक
मादिकंप्रत्यंजलिंनिषिंचेत्॥ततःकटिंवस्तिऊरूजंघेचरणौकरौप्रत्येकंमृत्तोयाभ्यांत्रिस्त्रि
प्रक्षाल्येकंपादंजलैअपरंस्थलेनिधायाचमेत्॥ततःउदकायनमइतितीर्थोदकंनमस्कुर्यात्॥

अश्वक्रांतेउद्धतासीतिद्वयोःवामदेवऋ॰अनुष्टुप्॰मृद्देव॰मृदभिमंत्रणग्रहणयोर्वि॰ततोमृदंह
स्तेनगृहीत्वाभिमंत्रयेत्॥अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे॥मृत्तिकेहरमेपापंयन्मयापूर्व
संचितं॥१॥उद्धतासिवराहेणकृष्णेनशतबाहुना॥मृत्तिकेब्रह्मदत्तासिकश्यपेनाभिमंत्रिता॥
मृत्तिकेहरतत्सर्वंयन्मयादुष्कृतंकृतं॥मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितं॥त्वयाहतेन पापे
नजीवामिशरदꣳशतमित्युक्ताहस्तस्थंमृदंसूर्यायदर्शयेत्॥इदंविष्णुरितिमेधातिथिऋ॰गा
य॰विष्णुर्देव॰अंगालंभनेवि॰॥इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्॥समूढमस्यपाꣳसुरे॥अ
नयाशिरःप्रभृतिनाभिपर्यंतानिगात्राणिमृदादक्षिणहस्तगृहीतयालिंपेत्॥ततःसव्यगृही
तयानाभितःपादपर्यंतंच॥ततःआचम्यजानैर्नाभिमात्रंजलंप्रविश्यसूर्याभिमुखः॥आपो
अस्मानितिमंत्रस्यप्रजापति॰अत्यष्टिछं॰अपोदेवतास्नानेवि॰आपोꣳअस्मान्मातरःशुंधयं

डाक्टर भाऊदाजी दृश्यश्राव्यसंग्रहालय MEMORIAL

तुघृतेननो घृतघः पुनंतु ॥ विश्वः हरिप्रंप्रवहंतिदेवीरुदिदाभ्यइत्यस्यप्रजापति॰यजुः छ॰आ
१८ पोदे॰उन्मज्जनेवि॰ॐउदिदाभ्यः शुचिरापूत एमीतिनिमज्योन्मज्यद्विराचमेत् ॥ पाणिभ्यांगो
मयमादाय ॥ अग्रमग्र मित्यस्य विश्वामित्र॰जगतीछंदःगोमयंदेवतागोमयाभिमंत्रणेवि॰॥
अग्रमग्रंचरंतीनांमोषधीनांरसंवने ॥ तासामृषभ पत्नीनांपवित्रंकायशोधनं ॥ यन्मेरोगा
श्चशोकांश्चपापंमेहरगोमयेति ॥ मानस्तोक इतिकुत्स॰जगती॰रुद्रोदे॰गोमयेनगात्रलेप
नेवि॰ॐ मानस्तोकेतनयेमान आयुषिमानो गोषुमानोअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभा
मिनोवधीर्हविष्मंतःसदमित्वाहवामहे ॥ अनेनशिरः प्रभृतीनिपादपर्यंतानिसर्वांगान्यनुलिं १८
पेत् ॥ तत्रापिनाभेरूर्ध्वंदक्षिणहस्तेन। अधःसव्येन। गोमयस्यापिसूर्यदर्शनंकार्यं। ततोलिंपनं॥
गोमयोपलिप्तशरीरएववक्ष्यमाणमंत्रैः प्रतिमंत्रंचुलकेनजलं शिरप्रक्षिपेत् ॥ तत्राभिषेकमंत्रा

णामृष्यादि॰॥ इमंमेवरुणेतिशुनःशेप॰गायत्री॰वरुणोदे॰अभिषेकेवि॰ तन्नःसत्तन्नःइत्यनयो
र्वामदेव॰त्रिष्टुप्॰अग्निवरुणौदेवते।अभिषेकेवि॰मापोमोषधीरितिप्रजापति॰अनवसानागा
यत्री॰हृदयशूलोदे॰अभिषेकेवि॰उदुत्तममितिशुनःशेपऋ॰त्रि॰वरुणो॰अभिषेके॰मुंचंतु
मेतिभिषगाथर्वणऋ॰अनुष्टुप्॰ओषधीदे॰अभिषेकेवि॰अवभृथनिचुंपुणेतिप्रजा॰जग
ती॰यज्ञो॰अभिषेके॰॥ इममेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥१॥ तत्वा
यामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशंस
समानआयुःप्रमोषीः ॥२॥ तन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः
॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् ॥३॥ सत्वन्नोऽअग्नेव
मोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहृ

वोन ऽएधि ॥४॥ मापोमौषधीर्हि ꣳसीर्द्धाम्नोधाम्नोराजंस्ततोवरुणनोमुञ्च ॥ यदाहुरघ्याऽ
इतिवरुणेतिशपामहेततोवरुणनोमुंच ॥५॥ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳ
श्रथाय ॥ अथावयमादित्यव्रतेतवानागसोऽअदितयेस्याम ॥६॥ मुंचंतुमाशपथ्यादथोवरु
ण्यादुत ॥ अथोयमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥७॥ अवसृथनिरुंपुणनिरेवरुरसिनिरुंपु
णः ॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुराजोदेवरिषस्पाहि ॥८॥ ततस्तूष्णीं
निमज्योन्मज्याचम्यदर्भैः पावयेत् ॥ तत्प्रकारस्तुत्रिभिर्दर्भैः साग्रैर्दक्षिणहस्तंधृतैःसोदकैर्ना
भेरारभ्यप्रदक्षिणनाभिपर्यंतंस्वशरीरं वक्ष्यमाणैरापो हिष्टेत्यादि गायत्र्यंतैः पावयेदिति ॰ ३९
तत्रार्घादि ॥ ॐ कारव्याहृतिगायत्रीणांपूर्ववत् ॥ आपोहिष्ठेतितिसृणांसिंधुद्वीपऋ॰गा
यत्री॰आपोदे॰इदमापइतिप्रजापति॰न्यवसानामहापंक्ति॰आपोदे॰हविष्मतीरिमाइति

प्रजापति॰अनुष्टुप्॰आपोयजमानोऽधरःसूर्यश्चदे॰देवीरापोअपान्नपादितिप्रजापति॰पं
क्तिछं॰आपोदे॰कार्षिरसीतिप्रजापति॰अनुष्टुप्॰आज्यंदे॰आपोदेवाइतिवरुण॰अनुष्टुप्॰
आपोदे॰द्रुपदादिवेत्यस्यसरस्वतींद्रादे॰अनुष्टुप्॰आपोदे॰शान्नोदेवीरित्यस्यासिंधुद्वीप
ऋ॰गायत्री॰आपोदे॰अपाꣳरसमितिबृहस्पति॰अनुष्टुप्॰रसोदे॰अपोदेवीरितिसिंधु
द्वीप॰न्यंकुसारिणीबृहती॰आपोदे॰पुनंतुमेतिद्वयोःप्रजापत्यश्विसरस्वतींद्राः॰अनुष्टुप्॰
पितरोदे॰अग्नआयूꣳषीतिवैश्वानर॰गायत्री॰अग्निर्देवता।पुनंतुमेतिप्रजापति॰अनु
ष्टुप्॰दिवमजनविश्वभृतजातवेदसोदेवता॥पवित्रेणेत्यादीनांपंचानांप्रजापत्यश्विसर
स्वतींद्राऋषयः।चतसृणांगायत्री॰पंचम्यास्त्रिष्टुप्॰यथाक्रमंअग्निरग्निर्ब्रह्माणोसोमः
सविताविश्वेदेवादेवताः।चित्पतिर्मेतिमंत्रेणप्रजापतिसवितारौ॰ॐकारव्याहृतीगायत्रीणां

मृष्यादिपूर्ववत्सर्वेषांपावमानेवि॰॥आदावंतेचप्रवादिगायत्र्यंतैःपावयेत्। यथोक्तं॥ॐकौरेण
व्याहृतिभिर्गायत्र्याचसमाहितः॥आदावंतेचकुर्वीतमार्जनंचयथाक्रममिति॥तत्रप्रयोगः
॥ॐभूःपुनातुॐभुवःपु॰ॐस्वःपु॰ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥धियोयोनःप्र
चोदयातूइतिपावयित्वा॥ॐआपोहिष्ठा॰॥३॥इदमापःप्रवहतावद्यंचमलंचयत्॥यच्चाभि
दुद्रोहानृतंयच्चशेपेऽअभीरुणम्॥४॥आपोमातस्मादेनसःपवमानश्चमुंचतु॥हविष्मती
रिमाऽआपोहविष्मांरंआविवासति॥हविष्मान्देवोऽअध्वरोहविष्मांऽअस्तुसूर्यः॥५॥दे
वीरापोऽअपान्नपाद्योवऊर्म्मिर्हविष्यऽइंद्रियावान्मदिंतमः॥तंदेवेभ्योदेवत्रादत्तशुक्रपेभ्यो
येषांभागस्थस्वाहा॥६॥कार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि॥समापोऽअद्भिरग्मतस
मोषधीभिरोषधीः॥७॥अपोदेवामधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः॥यास्त्वाभिर्मित्रा

वरुणावभ्यषिंचंन्याभिरिंद्रमनयन्नत्यरातीः॥८॥दुपदादिवमुमुचानःस्विन्नःस्नातोम
लादिव॥पूतंपवित्रेणेवाज्यमापःशुंधंतुमैनसः॥९॥शन्नोदेवीरभिष्टयऽआपोभवंतुपी
तये॥शंयोरभिस्रवंतुनः॥१०॥अपाᳬरसमुद्वयसᳬसूर्येसंतᳬसमाहितम्॥अपाᳬ
रसस्ययोरसस्तंवोगृह्णाम्युत्तममम्॥११॥अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजा
भ्यः॥तासामास्थानादुज्जिहतामोषधयःसुपिप्पलाः॥१२॥पुनंतुमापितरःसोम्यासः
पुनंतुमापितामहाःपुनंतुप्रपितामहाःपवित्रेणशतायुषा॥पुनंतुमापितामहाःपुनंतुप्र
पितामहाःपवित्रेणशतायुषाविश्वमायुर्व्यश्नवै॥१३॥अग्नेऽआयूᳬषिपवसऽआ
सुवोर्ज्जमिषंचनः॥आरेबाधस्वदुछुनाम्॥१४॥पुनंतुमादेवजनाःपुनंतुमनसाधियः॥
पुनंतुविश्वाभूतानिजातवेदःपुनीहिमा॥१५॥पवित्रेणपुनीहिमाशुक्रेणदेवदीद्यत्॥

अग्नेकव्यवाळ्कव्यंरक्षु॥१६॥यन्नेपवित्रमर्च्चिष्यग्नेवितततंतरा॥ब्रह्मतेनपुनातुमा॥१७॥प
वमानःसोऽअद्यनःपवित्रेणवि्चर्षणिः॥यःपोतासपुनातुमा॥१८॥उभाभ्यांदेवस
वितःपवित्रेणसवेनच॥मांपुनीहिविश्वतः॥१९॥वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमा
बव्यस्तन्वोवीतपृष्ठाः॥तयामदंतःसधमादेषुवयꣳस्यामपतयोरयीणाम्॥२०॥ॐभूः
तत्सवितुर्वरेण्यं॥चित्पतिर्मापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः॥तस्यतेपवित्रपते
पवित्रपूतस्ययत्कामःपुनेतच्छकेयम्॥ॐभुवःभर्गोदेवस्यधीमहि॥वाक्पतिर्मापुना
त्वच्छिद्रेण पवित्रेणसूर्य्यस्यरश्मिभिः॥तस्यते०॥ॐस्वःधियोयोनःप्रचोदयात्॥देवोमा २१
सवितापुनात्वच्छिद्रे णपवित्रेणसूर्य्यस्यरश्मिभिः॥तस्यते०॥ॐभूर्भुवः स्वःतत्सवितु०॥
चित्पतिर्मापुनातुवाक्पतिर्मा पुनातुदेवोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः॥

तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयं॥ॐभूःपुनात्वित्यादिगायत्र्यंतंपू
र्ववत्तान्कुशान्परित्यज्यपूर्ववदिमंमइत्यादिभिरष्टभिरभिषिंचेत्॥ततःऋतंचसत्यंचे
त्यघमर्षणऋ०अनुष्टुप्०भाववृत्तोदेवता॥अघमर्षणेवि०इतिस्मृत्वाऽपांमध्येनिमज्याघम
र्षणसूक्तंत्रिर्जपेत्॥अथवापूर्ववद्द्रुपदादिवेत्यस्यार्षादिस्मृत्वांतर्जलेजपेविनियोगंचस्मृत्वा॥
तांजपेत्॥अथवाअयंगोरित्येतत्सूक्तस्यसार्पराज्ञीऋषिः॥गायत्री०अग्निर्दे०अंतर्जलेजपेवि०
॥आयंगौःपृश्निरक्रमीदसदन्मातरंपुरः॥पितरंचप्रयंत्स्वः॥१॥अंतश्चरतिरोचनास्यप्राणा
दपानती॥व्यख्यन्महिषोदिवं॥२॥त्रिꣳशद्धामविराजतिवाक्पतंगायधीयते॥प्रतिवस्तोरहद्यु
भिरितिसूक्तमंतर्जलेत्रिरावर्त्तयेत्॥ॐमितिवात्रिरावर्त्तयेत्॥तस्यार्षादिपूर्ववज्जपेवि०॥
अथाविद्युत्स्मरेत्॥ततःआचमनंजलेनैवस्नानांगतर्पणंकुर्यात्॥ततःशिष्टाचाराद्ब्राह्मण

पादोदकग्रहणं। ततोविष्णुपादोदकपात्रांतरेणगृहीत्वाप्रथमंपिबेत्॥ ततःशंखेनतुलसी
लमिश्रितंतद्गृहीत्वाशालग्रामशिलोपरित्रिर्भ्रामयित्वाशिरस्यंगेषुचप्रक्षिपेत्॥ तथाचगौत
मीतंत्रं॥ शालग्रामशिलातोयंतुलसीदलमिश्रितं॥ कृत्वाशंखेभ्रामयंस्तिर्निक्षिपेन्निजमूर्धनि
॥ शालग्रामशिलातोयमपीत्वायस्तुमस्तके॥ प्रक्षेपणंनकुरुतेब्रह्महासनिगद्यते॥ विष्णुपादो
दकात्पूर्वं विप्रपादोदकंपिबेत्॥ विरुद्धमाचरन्मोहादात्महासनिगद्यते॥ पृथिव्यांयानितीर्थानि
तानितीर्थानिसागरे॥ ससागराणितीर्थानिपादेविप्रस्यदक्षिणे॥ शंखेकृत्वातुपानीयंभ्रामयेत्के
शवोपरि॥ वारिधेनुसहस्रस्यफलंप्राप्नोतिनावता॥ सर्वेवावभृथस्नातःसचगंगाजलाप्लुतः॥
विष्णुपादोदकंकृत्वाशंखेयःस्नातिमानवः॥ स्नातेनैवालिपापस्यदेहिनंदेहमध्यतःसबाह्या
भ्यंतरंतस्यव्याप्तंपादोदकेनवै॥ सर्वमंगलमांगल्यंसर्वदुःखविनाशनं॥ दुस्वप्ननाशनंपुण्यंस

MEMORIAL

र्वव्याधिविनाशनं॥ ॥ततोगोदोहनकालमात्रंतिष्ठेत्। ततःशिरसोजलापनयनार्थंउष्णीषंशिरसि
वेष्टयेत्॥ शाक्तःसन्नंगेभ्यःजलंवस्त्रेणपाणिनावासमुद्धरेत्॥ अशाक्तस्तुस्नानवस्त्रव्यतिरिक्ते
नवस्त्रेणसमुद्धरेत्॥ ततोद्विराचम्य॥ नाद्भिःप्रक्षालितसदृशंकृष्णनीलोल्बणरक्तभिन्नंशुष्कं
तस्यासंभवेनिष्पीडितंसत्सवारंवताहतंकार्पासंतस्यासंभवेकौशेयादिवाबद्धत्रिकछंयथाम
वतितथापरिधायताद्दशेनैवद्वितीयेनोत्तरीयंकुर्यात्॥ तदभावेक्षौमादिना॰तस्याप्यसंभवेन
दर्थंतृतीयंयज्ञोपवीतंधारयेत्॥ तस्याप्यसंभवेपरिधानीयैकदेशेनोत्तरीयंकुर्यात्॥ स्नानी
यार्द्रवस्त्रोतारणंतूर्ध्वमेवकर्तव्यंनाधोमार्गेण॥ ततोजंघेचरणौकरौचप्रत्येकंमृदात्रिस्त्रिःप्र
क्षालयेत्॥ ततःकर्मांगंपुराणोक्तंगोपीचंदनादिभिःतिलकंकुर्यात्॥ तत्रयेकेवलंशैवास्तेषां
विभूतित्रिपुंड्ररुद्राक्षादिधारणमेवधर्मः॥ येकेवलंवैष्णवास्तेषांगोपीचंदनोर्ध्वपुंड्रशंखादि

न्हितुलसीकाष्ठमालाधारणमेवधर्मः।येतूभयभक्तास्तेषामुभयधारणमेवधर्मइति॥तस्माच्चपुरा
णे॥स्नात्वापुंड्रं मृदाकुर्याद्दत्वाचैवतुभस्मनेति॥तुलसीकाष्ठसंभूतांयोमालांवहतेनरः॥सदाग्नी
तमनास्तस्यकृष्णोदेवकिनंदनः॥निवेद्यकेशवेमालांतुलसीकाष्ठसंभवां॥वहतेयोनरोभक्त्या
तस्यवैनास्तिपातकं॥तथा॥धात्रीफलकृतांमालांकंठेवहतिमानवः॥सोश्वमेधायुतंपुण्यंयामे
यामेलभेन्नरः॥तथा॥पुण्यानांपरमंपुण्यंपवित्रंपापनाशनं॥रुद्राक्षधारणंश्रेष्ठमिहलोके
परत्रच॥मूर्खोवाप्यंत्यजोवापिमुक्तोवासर्वपातकैः॥रुद्राक्षंधारयेद्यस्तुसरुद्रोनात्रसंशयः॥
रुद्राक्षंधारयेद्यस्तुसंध्यादिषुचकर्मसु॥अरुद्राक्षधरोभूत्वायद्यत्कर्मचवैदिकं॥करोतिज २३
पहोमादितत्सर्वं निष्फलंभवेदिति॥ततःश्रीपर्ण्यादिप्रशस्तदारुनिर्मितेप्रक्षालितेपीठे प्राग
ग्रैरुदग्रैर्वात्रिभिःकुशैरास्तृतेप्राङ्मुखउदङ्मुखोवोपविश्यदक्षिणहस्तेपवित्रेवामहस्तेउपग्र

हाकुशान्धृत्वास्वर्णरौप्यखड्गालंकृतदक्षिणपाणिद्विराचम्यसंध्योपासनमारभेत्॥ ॥अथमध्या
ह्नसंध्या॥द्विराचम्यमध्यान्हसंध्योपासनमहंकरिष्येइतिसंकल्प्यआवाहनपर्यंतंपूर्ववत्॥
अथावाहनं॥सावित्रींयुवतींशुक्लांशुक्लवस्त्रांत्रिलोचनांत्रिशूलिनींश्वेतवृषभारूढांयजुर्वेदेन
संयुतांरुद्राणींरुद्रदेवत्यांरुद्रलोकनिवासिनीं॥कैलासविहितावासामायांतींरुद्रमंडलात्॥
वरदांत्र्यक्षरांसाक्षाद्देवीमावाहयाम्यहं॥आगच्छ वरदेदेवित्र्यक्षरेरुद्रवादिनि॥रुद्राणिछद
सांमानरुद्रयोनेनमोस्तुतेइति॥आपःपुनंत्वित्यस्यकश्यपऋ॰त्रिष्टुप्॰आपोदे॰आचमनेवि॰॥
ॐआपःपुनंतुपृथिवीपृथिवीपूतापुनातुमां पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां॥यदुच्छिष्टम
भोज्यंयद्वादुश्चरितंमम॥सर्वंपुनंतुमामापोसतांचप्रतिग्रहꣳस्वाहा॥अनेनमंत्रेणसकृदाच
म्यततःस्मार्तंद्विराचमनं॥ततःआपोहिष्ठादि॥अर्घ्यदानेतुपुष्पाणिपत्राणिवांबुमिश्राणिअं

जलिनादायोत्थायसप्रणवव्याहृतिकांगायत्रींपठित्वाआदित्याभिमुखः सकृदर्घ्यंदद्यात्॥त
२४ थाचव्यासः॥कराभ्यांतोयमादाय गायत्र्याचाभिमंत्रितं।आदित्याभिमुखस्तिष्ठन्त्रिःक्षिपेत्सं
ध्ययोर्द्वयोः॥मध्याह्नेतुसकृदेवक्षेपणीयंद्विजातिभिरिति॥ततऊर्ध्वबाहुःसूर्यमुदीक्षमाण
उपतिष्ठेत॥उद्वयमित्यादिगायत्रीजपांतंपूर्ववत्॥अनेनाष्टोत्तरशतसंख्याकेनमध्याह्नसंध्यां
गम्तेनगायत्रीजपेनरुद्रस्वरूपीसवितादेवता प्रीयतां।अन्यत्सर्ववत्॥ततः सूर्याभिमुखस्ति
ष्ठन्नूर्ध्वबाहुसूर्योपस्थानंविभ्राडित्यनुवाकादिभिःकुर्यात्॥विभ्राडित्याद्याकृष्णेनेत्यंताना
मृष्यादि पूर्ववत्स्मरेत्।अनुवाकंपठेत्॥सहस्रशीर्षेतिषोडशानांनारायण•पंचदशानांमनु
ष्टुप्षोडश्यास्त्रिष्टुप्छं•पुरुषोदे•सूर्योपस्थानेवि•ॐसहस्रशीर्षापुरुषइत्यारभ्यसंतिदेवा २४
इत्यंतंपठेत्॥यज्जाग्रतइतिषड्ऋचस्यशिवसंकल्पऋ•त्रिष्टुप्•मनोदे•सूर्योपस्थानेवि•ततःॐ

यज्जाग्रतोदूरमित्यारभ्यहृत्प्रतिष्ठंयदजिरंयविष्ठंतन्मेमनःशिवसंकल्पमस्तुएतदंतंपठेत्॥मंडलब्रा
ह्मणस्यविवस्वान्ऋषि•वायुर्देवतासूर्योपस्थानेवि•ॐयदेतन्मंडलमित्यारभ्यसोमृतोभवतिमृत्युर्य
स्यात्माभवतीत्येतदंतंपठेत्॥एतैरुपस्थायप्रदक्षणीकृत्यनमस्कृत्यब्रह्मयज्ञंकुर्यात्॥ अथब्र
ह्मयज्ञस्यस्वरूपनिर्देशपूर्वकंकालमाहकात्यायनः॥यश्चश्रुतिजपःप्रोक्तोब्रह्मयज्ञस्तुसस्मृतः॥
सन्ध्यार्वाकूतर्पणात्कार्यःपश्चाद्वाप्रातराहुतेः॥वैश्वदेवावसानेवानान्यदार्नेनिमित्तकादिति॥नि
मित्तकादृते।प्रतिबंधकंविनाप्यदानकुर्यादित्यर्थः।अत्रवैश्वदेवशब्देनमनुष्ययज्ञांतंकर्म॥
अतएवकूर्मपुराणे॥यदिस्यात्तर्पणादर्वाकूब्रह्मयज्ञःकृतोनहिकृत्वामनुष्ययज्ञंवैततः स्वाध्या
यमारभेदिति।तस्यप्रकारस्तु।आसनोपरिप्रागग्रान्दर्भानास्तीर्यतत्रप्राङ्मुखउदङ्मुखोवो
पवित्रयपवित्रपाणिराचम्यब्रह्मयज्ञमहंकरिष्यइतिसंकल्प्यदक्षिणपादोपरिवामपादंव्यत्यस्यनि

धायप्राङ्मुखपवित्रवत्यपिदक्षिणहस्तेपवित्रांतरंगृहीत्वावामहस्तोपरिदक्षिणहस्तंपवित्रगर्भंनिधा
य।प्रणवमहाव्याहृतिगायत्रीणामृष्यादिब्रह्मयज्ञेविनियोगंचस्मृत्वातद्दिनकर्तव्यब्रह्मयज्ञविष
२५ यीभूतवेदभागस्यार्षादिकंचस्मृत्वाप्रणवादिगायत्र्यंतंपठित्वाऽग्नेस्त्वेत्यादिवेदमारभ्याऽनुवाक
शोऽध्यायशोयजुषोवासंहितांब्राह्मणंचाध्यायशोब्राह्मणशोवाप्रणवावसानंयथाशक्तिप्रत्यह
मधीयानोमंत्रंब्राह्मणंचसमाप्यपुनरेवमेवारभ्यसमापयेत्॥अनध्यायेऽल्पाक्षरेणाल्पतरंपठे
त्॥अंतेप्रणवमुच्चार्यनमोब्रह्मणेनमोस्त्वग्नयेनमःपृथिव्यैनमःओषधीभ्यःनमोवाचे नमोवा
चस्पतयेनमोविष्णवेमहतेकरोमीत्यंतंपठेत्॥द्वितीयदिनेपूर्वपठितभागंस्मृत्वाऽन्यमन्यंभागंपठेत्॥
अंतेपुनःप्रणवादिकरोमीत्यंतंपठेत्॥तथावेदेषुउपनिषदुपाख्यानेषुकीर्विद्यांइतिहासादिषु २५
गीतांपृथगपिपठेत्॥यस्त्वनधीतसंपूर्णवेदःसयत्किंचिद्वेदभागंपुरुषसूक्तादिरूपं॥आध्यात्मि

कींविद्यांइतिहासपुराणादिकंगायत्रीवाजपेत्॥ॐकारंव्याहृतीस्तिस्रःसावित्रींत्रिपदांजपेत्॥ज
प्तापुनातिपुरुषंमपिभ्रूणहनंनृपं॥ब्रह्मयज्ञप्रसिध्यर्थंविद्यांचाध्यात्मिकींजपेत्॥जप्त्वाचप्रणवंवा
पितत्तर्पणमाचरेत्॥इतिहासपुराणानियथाशक्तिनहापयेत्॥इत्याश्वमेधिकवचनात्॥तथाचं
द्विकायांमनुः॥अपांसमीपेनीयतेनेत्यकंविधिमास्थितः॥सावित्रीमप्यधीयीतगत्वारण्यंस
माश्रितइति॥याज्ञवल्क्यश्च॥वेदार्थवत्पुराणानिसेतिहासानिशक्तितः॥जपयज्ञप्रसिद्ध्यर्थंवि
द्यांचाध्यात्मिकींजपेदिति॥अनध्यायेऽल्पपाठमाहापस्तंबः॥अथयदिवातोवायात्तत्तनये
द्वाविद्योततेवास्फूर्जेदेकामृचंमेकंवायजुरेकंवासामाभिव्याहरेदिति॥वातादिकमभावास्या
द्यनध्यायमात्रोपलक्षणमितिब्रह्मयज्ञः॥ ॥अथतर्पणं तत्रोक्तंस्कंदपुराणे॥पूर्वंमोदप्रमो
दादींस्तर्पयेत्॥षड्विनायकान्॥ततोब्रह्मादयोदेवास्तर्पणीयाःमहामते॥नतश्चसनकादीनां

प्रयतस्तूसिमाचरेत्॥अग्निष्वात्तादिकानांतुपितॄणांचक्रमानुक्रमात्॥यमायधर्मराजायकुर्वन्सं
तर्पणंततः॥पितॄणामथमातॄणांततोमातामहस्यच॥पत्नीश्वश्वशुरबंधूनांसुहृत्संबंधिनांतत
इति॥पितृतर्पणेविशेषमाह पैठीनसिः।अपसव्यंततःकृत्वास्थित्वाचपितृदिङ्मुखः॥पितॄन्
दिव्यानदिव्याश्चपितृतीर्थेनतर्पयेत्॥जैमिनिरपि॥देवान्पितॄंश्चसंतर्प्यस्वपितॄनथतर्पयेत्॥स
त्यव्रतः।पूर्वंस्वपितरस्तर्प्याःपश्चादन्यांश्चतर्पयेत्॥पितृभ्यःप्रथमंदद्यात्ततोमातृभ्यएवच॥
ततोमातामहांश्चपितृव्यस्यसुतस्यचसुहृत्संबंधिबंधूनांततःकुर्यात्तुतर्पणं॥अत्रपितृव्यग्र
हणंतुमातामहाद्युपलक्षणमित्यर्थः॥व्यासः॥पूर्वंपित्रादयस्तर्प्यास्ततोमात्रादयोपिच॥त
तोमातामहाश्चैवमातामह्यस्ततःपरं॥मातामहतर्पणानंतरंगरुडपुराणे॥अथमातामहा
दीनांस्वपत्नीनामनंतरं॥तर्पणंचपितृव्यानांतत्सपत्नीभ्यस्ततोपिच॥पितृष्वसृभ्यस्तद्वर्तुर्म

तुलस्यापिनित्यशः॥मातुलान्यास्ततोमातृष्वसुस्तत्पुत्रेचच॥श्वशुरस्यचकर्तव्यंश्वश्रूणा
मपितर्पणं॥आचार्याणांततःकुर्यादाचार्याणीष्वएव॥बंधूनांभ्रातृपत्नीनांपुत्रेचैवस्नुषामपि॥पुत्रीतत्स्याःपतिंचैवभगिनीतत्सतिंतथा॥भागिनेयंचपैत्रंचदौहित्रंयाज्यमृत्वि
ज॥शिष्यंमित्रंचसंतर्प्यतत्सपत्नीभ्यस्तथैवच॥अन्येषामपिदातव्यंयेभ्योयंदातुमिच्छति॥माता
मह्यादिसर्वेषामेकैकंसजलांजलिं॥दद्यात्तीर्थविशेषेणधर्मपरमआस्थितः॥हेमाद्रौभोजराजा
ये॥पितृमातृमातामहापितृव्यभ्रातरःसुतःपितृष्वसामातुलाश्चतद्भगिन्यश्चजामयः॥भार्यापितृव्यपु
त्राश्चभ्रातृपुत्रास्तथैवच॥दुहिताश्चश्वशुरश्चैवमातुलागुरवस्तथा॥आचार्यसुहृदःज्ञालाउपाध्या
यश्चपोषकाः॥स्वामिनश्चसखायश्चमातापित्रोश्चबांधवाः॥आत्मनोबांधवाश्चैवज्ञाताज्ञाताय
थाक्रमं॥तर्पणेचगयाश्राद्धेतीर्थेमहालयेक्रमइति॥सूत्रेअनुक्रमणावाहनंकार्यं॥आवाह्यपूर्व

वन्मंत्रैरासीर्यन्चकुशानप्सुमान्॥प्रागग्रेषुसुरानप्सम्यक्प्रदक्षिणाग्रेषुवैपितॄनितियोगियाज्ञवल्क्यो
कैः॥देवतासन्निधानार्थमविरुद्धंगृह्यते॥द्यौरस्त्रौयुग्मतःकृत्वापूरयेदुदकांजलिं॥गोशृंगमा
त्रमुद्धृत्यजलमध्येजलंक्षिपेत्पूरनियमोक्तैः॥प्रादेशमात्रमुद्धृत्यसजलंप्राङ्मुखः सुरान्॥उद
ङ्मुखुनुष्यांस्तर्पयेत्सिनीवालीदर्शिणतस्तथेतिवचनाच्च॥प्रादेशमात्रमुद्धृतांजलिःप्रसव्यः॥देवानृत्रह्म
ऋषींश्चैवतर्पयेदक्षतोरकैरित्युक्तिकौमादेवब्रह्मर्षितर्पणंयवैः॥शुक्लैस्तर्पयेद्देवानितिगोभिलो
कैः॥शुक्लतिलैर्वा।हेमाद्रौ छागलेयः।लघुपात्रंकरेधृत्वासौवर्णिरवङ्गमेववा॥राजतंताम्रजंवापि
तेनसंतर्पयेत्सितान्॥तत्रैवशंखः॥सौवर्णनपात्रेणराजतेनौदुंबरेणरवङ्गपात्रेणशंकुनावाप्युदकं
पितृतीर्थेस्पृशन्नुदयात्॥शंकुना।सुवर्णादिनिर्मितयाशलाकया॥अथप्रयोगः॥यज्ञोपवीती
प्राङ्मुखस्त्रीन्पुमान्दक्षिणपाणिनादाय।विश्वेदेवासःआगतेतिप्रजापतिऋषिःगायत्री॰विश्वे

देवादे॰आवाहनेवि॰॥विश्वेदेवासःआगतशृणुतामःइमंहवम्॥एदंबर्हिर्निषीदत॥विश्वेदेवाःशृणु
तेमंमित्यस्यस्वयंभूःब्रह्मा॰त्रिष्टुप्॰विश्वेदेवादे॰जपेवि॰॥ॐविश्वेदेवाःशृणुतेमंहवंमेयेऽअंत
रिक्षेयऽउपद्यविष्ठ॥येऽअग्निजिह्वाउतवायजत्राआसद्यास्मिन्बर्हिषिमादयध्वं॥ततःसयवे
नसशुक्लतिलनवोदकेनगोशृंगमात्रोद्धृतेनप्रागग्रासुतकुशेषुजलमध्येवादेवतीर्थेनांजलिंक्षि
पेत्॥ॐमोदस्तृप्यतां॥प्रमोदस्त्॰सुमुखस्त्॰दुर्मुखस्त्॰अविघ्नस्त्॰विघ्नकर्तात्॰ततोदेवानामेकै
कांजलिनातर्पणं॥तत्रमंत्राः॥ॐब्रह्मात्॰विष्णुस्त्॰रुद्रस्त्॰प्रजापतिस्त्॰देवास्तृप्यंतां।छंदाꣳसित्॰
प्यंतां।वेदास्त्॰ऋषयस्त्॰पुराणाचार्यास्त्॰गंधर्वास्त्॰इतराचार्यास्त्॰संवत्सरःसावयवस्तृप्य॰
देव्यस्तृप्यंतां।अप्सरसस्त्॰देवानुगास्त्॰नागास्त्॰सागरास्त्॰पर्वतास्त्॰सरितस्त्॰मनुष्यास्त्॰
यक्षास्त्॰रक्षाꣳसित्॰पिशाचास्त्॰सुपर्णास्त्॰भूतानित्॰पशवस्त्॰वनस्पतयस्त्॰ॐषधयस्त्॰॥

भूतग्रामश्चतुर्विधस्तृप्यतां॥इमंप्रत्येकंयवमिश्रमेकैकमुदकांजलिंप्राङ्मुखउदङ्मुखोवार्घो
तू॥देवतीर्थेनैवांजलिंपूरयित्वातेनैवनिक्षिपेत्॥तर्पणंजलस्थेनार्द्रवाससाजलएवकार्यं॥शु
ष्कवाससास्थलस्थेनस्थलएव॥अशुचिचेत्स्थलंदृष्टकाचितंवातदास्थलस्थोपिजलएवांज
लिंक्षिपेत्॥स्थलेचेत्प्रागग्रान्दर्भान्नास्तीर्यदेवान्॥उदग्गाग्रान्नास्तीर्यमनुष्यान्॰दक्षिणाग्रान्ना
स्तीर्यपितॄंस्तर्पयेत्॥ततःउदङ्मुखऊर्ध्वजानुरुदग्रैःकुशैःप्राजापत्येनतीर्थेनद्वाभ्यांद्वाभ्यामंजलि
भ्यांसनकादींस्तर्पयेत्॥अथवावामपाणितलेमूलानिअग्राणितुदक्षिणपाणितलेकृत्वाकुशमध्यप्रदे
शेनमनुष्यांस्तर्पयेत्प्राजापत्येनैवांजलिपूरणंतेनैवप्रक्षेपणं॥यवैःशबलतिलैर्वामनुष्यतर्पणं॥
शुक्लतिलैःपितॄनिति।तत्रमनुष्यतर्पणं।ॐसनकस्तृप्यतां२सनंदनस्तृ॰२।सनातनस्तृ॰२।कपिलस्तृ
॰२।आसुरिस्तृ॰२।वोढस्तृ॰पंचशिखस्तृ॰एवमेकैकस्यद्वौद्वावंजलीदद्यात्॥अत्रप्रत्यंजलिंमंत्रआ

DELHI MEMORIAL

वर्तनीयः।द्रव्यभेदात्।अनुद्धृतस्यत्यागायोगात्।कालभेदाच्च।एकैकस्यैवसोमयागस्येंद्रवायवा
दिग्रहाभ्यासवत्प्रत्यंजलिमभ्यसनीयः॥एवंपितृतर्पणेपि।तत्रचोद्धृतस्येवेदंजलमितिनिर्देश
संभवात्भेदाच्च।मंत्रोपिप्रत्यंजलिमभ्यस्यते॥ततोदक्षिणामुखःसव्यंजान्वाच्यप्रसव्यंकृत्वा।
उशंतस्त्वा॰॥आयंतुनइतिद्वाभ्यांमंत्राभ्यांपितॄनावाहयेत्॥तत्रोशंतस्त्वेत्यस्यप्रजापत्यश्चिसर
स्वत्यऋषयःगायत्रीछ॰पितरोदे॰आवाहनेवि॰॥आयंतुनइतिशंख ऋषिःत्रिष्टुप्॰पितरोदे॰
आवाहनेवि॰ततस्तानेवदर्भान्द्विगुणान्कृत्वासव्यांगुष्ठेनतर्जन्यावातिलानादायदक्षिणपाणौ
कृत्वादक्षिणहस्तांगुष्ठेनतर्जन्यावातिलानादायवामहस्ततलेकृत्वापितृतीर्थेनांजलिंपूरयि
त्वागोशृंगमात्रमुद्धृत्यतेनैवप्रक्षिपेत्॥एकैकस्मैत्रीस्त्रीनंजलीन्दद्यात्॥ॐकव्यवाडनलस्तृ॰
एवंत्रिवारं॥ॐसोमस्तृ॰यमस्तृ॰अर्यमास्तृ॰अग्निष्वात्ताःपितरस्तृ॰सोमपाःपितरस्तृ॰बर्हिषदःपि

तरस्तृ॰इतिदिव्यपितृतर्पणंइच्छयाकृत्वा॥यमतर्पणं॥यमायनमइत्यादिप्रयोगेणैकैकस्मैअंजलि
त्रयंदद्यात्॥ॐयमायनमः३धर्मराजाय॰३मृत्यवे॰३अंतकाय॰३वैवस्वताय॰३कालाय॰३सर्वभू
तक्षयाय॰३औदुंबराय॰३दध्नाय॰३नीलाय॰३परमेष्ठिने॰३वृकोदराय॰३चित्राय॰३चित्रगुप्ताय
॰३एवंयमतर्पणं कृत्वामृतपितृकश्चेत्तर्हिस्वपितृतर्पणंकुर्यात्॥अमुकगोत्रोऽस्मत्पिताऽमुकश
र्माऽमुकवसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः३॥अमुकगोत्रोऽस्मत्पितामहः३अमुकगोत्रोस्मत्पिता
महः३॥उदीरतामवरउत्परासऽउन्मध्यमाःपितरःसोम्यासः।असुंयऽईयुरवृकाऋतज्ञास्तेनोऽवन्तु
पितरोहवेषु॥इतिसप्तर्णांशंखःप्रजापतिऋ॰त्रिष्टुप्॰पितरोदे॰येचेहपितर
इतिप्रजाप्रत्यश्विसरस्वत्यऋ॰त्रिष्टुप्॰पितरोदे॰उर्जंवहंतीतिप्रजापति॰गायत्री॰पितरोद॰मधु
वाताइतिऋचस्यगौतमऋ॰गायत्री॰विश्वेदेवादे॰सर्वेषांप्रसेकाख्येकर्मणिवि॰ॐउदीरताम॰ततः
तृप्यध्वं॥ॐतृप्यध्वंॐतृप्यध्वंॐइतिमंत्रैःप्रसेकाख्यंकर्मकुर्यात्॥तत्रांजलिस्थमुदकंपितृती

र्थेनसिंचेत्॥अत्रकेचित्॥उदीरतामित्यादीनांपित्रादितर्पणेंजलिदानकरणत्वंमन्यंते॥तन्न॥सूत्रार्थ
पर्यालोचनयाकरणत्वस्याप्रतीतेःकथंजपन्प्रसिंचेदित्यत्रजपन्नितिशतृप्रत्ययेनमंत्रान्जपता
सतासंततंजलप्रसेकःकार्यइत्यर्थप्रतीतेःकरणत्वेतुमंत्रांतैःकर्मादिःसान्निपात्य इतिपरिभाष
यामंत्रसमासेऽजलिरेयःतथासतिजपशब्दस्यशतृप्रत्ययस्यचानैक्यप्रसंगः॥प्रसेकशब्दस्यरू
नार्थताकल्पनाच्च॥तस्मात्प्रसेकाख्यमिदंकर्मेतर॥तथाचयोगयाज्ञवल्क्यः॥पितॄनध्यायेत्प्रसि
चेद्वैजपन्मंत्रान्यथाक्रममिति॥ततोऽमुकगोत्राऽस्मन्माताऽमुकदातृप्यतामिदंजलंतस्यैस्वधा
नमः३अमुकगोत्रास्मत्पितामही॰अमुकगोत्रास्मत्पितामही॰नागदेवाचारप्रदीपेसालंका
यनः॥मातृमुख्याश्चयास्तिस्रस्तासांदद्याज्जलांजलीन्॥त्रींस्त्रींश्चतस्रभ्यान्यास्तासामेकैक
मंजलिं॥एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः॥अर्हंतिपितरस्त्रींस्त्रीन्स्त्रियश्चैकैकमंजलिमि

त्यत्रस्त्रीपदंमात्रादित्रयेतरमित्यध्यवसीयते॥मात्रादित्रिकस्यप्रत्येकमेकैकोंजलिरितिप्राच्याः॥
ततोनमोवइतियजुषांप्रजापतिपरमेष्ठी॰यजु॰पितरोदे॰जपेवि॰ॐनमोवः पितरोरसाय॰इतिजप्त्वा
ऽमुकगोत्रोस्मन्मातामहोऽमुकशर्मातृप्यतामिदंजलंतस्मैस्वधानमः॰अमुकगोस्मत्प्रमातामह
॰अ॰वृद्धप्रमातामह॰ततोमातामह्यादीनांतिस्रणामेकैकमंजलिंदद्यात्॥॰अमुकगोत्रास्मन्माता
महीअमुकदातृप्यतामिदंजलंतस्यैस्वधानमः॥अमु॰अस्मत्प्रमातामही॰अमु॰अस्मद्वृद्धप्रमा
तामही॰ततः पितृव्यतत्सलीज्येष्ठभ्रातृतत्सलीमातुलतत्सलीपितृष्वसृमातृष्वसृश्वशुरतत्सलीम
गिनीदुहितृआचार्योपाध्यायतत्सलीनांबालकर्त्विजसमानोदकसगोत्रशिष्ययाज्यादिभ्यः
सवर्णेभ्यःसवर्णेभ्यः एकैकमंजलिंदद्यात्॥तत्रप्रयोगः॥अमुकगोत्रोस्मत्पितृव्योऽमुकशर्मा
तृप्यतामिदंजलंतस्मैस्वधानमः॥अमुकगोत्रास्मत्पितृव्याणीअमुकदेवीतृप्यतामिदंजलंतस्मैस्व

धा॰एवमुत्तरत्रापिस्त्रिपुंसयोःप्रयोगोद्रष्टव्यः॥अमु॰अस्मद्भ्राता॰अमु॰अस्मद्भ्रातृपत्नी॰अस्मद्भगि
नी॰अस्मन्मातुल॰मातुलानी॰अस्मत्पितृष्वसा॰अस्मन्मातृष्वसा॰अस्मत्पितृष्वस्रेयः॥अ॰मातुलेयः॰
अ॰अस्मत्संपिडः॰अ॰अस्मन्मातृसंपिंडः॰अस्मत्समानोदकः॰अस्मत्सगोत्रः॰अस्मत्श्वशुरः॰
अस्मत्श्वश्रूः॰अस्मच्छालकः॰अस्मत्ऋत्विक्॰अ॰अस्मच्छिष्यः॰अस्मद्याज्यः॰॥अत्रसूत्रका
रेणमातृतर्पणंनयद्यपिकंठरवेणोक्तंतथापिस्त्रीणामेकैकमंजलिमित्यभिधानान्नस्याभिप्रेतं।तत्किंपित्रा
दितर्पणोत्तरमेवकिंवामातामहतर्पणोत्तरमितिविचारेपित्रादित्रिकतर्पणानंतरमितियुक्तमेवभाति॥
तथाहि पित्रादीन्मात्रादीन्पितृव्यं।स्वसलीज्येष्ठभ्रातृस्वसलीर्मातुलांस्वसलीरुपाध्यायान्सुहृ
त्संबंधिबांधवांस्वसलीश्चतर्पयेत्॥पितृव्यस्तर्पणंदद्यात्ततोमातृव्य एवच॥ततोमातामहानांचक्र
मएवतुतर्पणे॥पित्रेपितामहानांचमात्रेदद्यात्ततोजलं॥पितामह्यैस्वतोदद्यान्मातामहकुलेतनः॥अं

तर्मातामहान्कृत्वामातृणांयः प्रयच्छति॥समूढोनरकंयातियावदाभूतसंप्लव मितिहारीतसत्यव्रतम
रीचिशंखस्मृतिवाक्यसंग्रहस्थ वाक्येषुमातामहतर्पणात्सर्वे मात्रादितर्पणस्योक्तत्वाद्हुभिर्वाक्यैरे
कवाक्यत्वसंभवात्॥नचयोगियाज्ञवल्क्योक्ततर्पणस्यकात्यायनोक्ततर्पणसमानत्वान्नेनत्वमातामह
ानूसरवीनित्युक्तामात्रेश्रमात्रेइत्यादिवचनेन माहामहतर्पणानंतरमेवमातृतर्पणमिति वाच्यं।त
थासतिसरिवतर्पणानंतरं मात्रादीनांतर्पणानुष्ठानमसंगात्॥नचस्मृत्यंतरानुज्ञानाद्बहिरंगत्वाच्च
सरिवतर्पणस्यमातामातामहतर्पणानंतर्यबाध्यतइतिवाच्यं॥बहुस्मृत्यनुज्ञानान्मातामहापेक्षया
मात्रादीनामंतरंगत्वाच्च मात्रादितर्पणस्य मातामहादितर्पणानंतर्यबाध्यतइत्यप्यसुवचनत्वा
त्॥तस्माद्योगियाज्ञवल्क्यवचनस्यक्रमेणतात्पर्यं॥तात्पर्यंवाकण्वशाखाविषयत्वमित्येवव्य
वस्थेत्यास्तांविस्तरः॥ततोयेबांधवाबांधवायेन्यजन्मनिबांधवाः॥तेतृप्तिमखिलांयांतुय

श्चास्मन्नोभिवांछति॥इतिमंत्रेणभुविएकमंजलिंप्रक्षिप्य।येकेचास्मत्कुलेजाताअपुत्रागोत्रि
णोमृताः॥तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोदकमितिमंत्रेणस्नानवस्त्रंनिष्पीडयेत्॥एतच्च
प्रतिपत्निकर्मापिस्विष्टकृद्यागवद्देवतोद्देशात्यागांशेऽदृष्टार्थंच।तेनासामर्थ्यादकृतस्नान
स्यप्रतिपाद्याभावेपिजलांतरेणापिकर्तव्यं॥पराशरः॥द्वादश्यांपौर्णमायांचसंक्रांतौश्रा
द्धवासरे॥वस्त्रंनिष्पीडमेन्नैवनचक्षारेणयोजयत्॥निराशाःपितरोयांतिवस्त्रनिष्पी
डनेकृते॥तस्मान्निष्पीडयेद्वस्त्रंनकृत्वापितृतर्पणं॥जलमध्येतुयःकश्चिद्ब्राह्मणोज्ञा
नदुर्बलः॥निष्पीडयतिचेद्वस्त्रंस्नानंतस्यवृथाभवेत्॥ततोयज्ञोपवीतिभूत्वाद्विगुणि
तकुशानुत्तरतःपरिस्रजेत्॥तत्रमंत्रः।येषांनपितानभ्राताननपुत्रोनान्यगोत्रिणः॥ते
सर्वेतृप्तिमायांतुमयोत्सृष्टैःकुशैःसदा॥ततःपादावुभयत्रस्थाप्यद्विराचम्यहस्तदर्भान्

परित्यजेत्॥आचम्यैवकुशत्यागोनततः प्राकूइतितर्पणप्रयोगः॥ ॥अथस्नानांगभूत
३२ जलदेवतापूजनं॥आ॰चम्य॰ब्रह्मयज्ञानमितिप्रजापति॰त्रिष्टुप्छं॰ब्रह्मादे॰ब्रह्मपूज
नेवि॰ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेन॰आवः॥सबुध्न्याऽउपमाऽअस्य
विष्ठाःसतश्चयोनिमसतश्चविवः॥१॥इत्यनेनब्रह्माणमावाहनाद्यैरभ्यर्च्य॥इदंविष्णु
रितिमेधातिथिरृ॰ गायत्री॰विष्णुर्दे॰विष्णुपूज॰ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधे
पदं॥समूढमस्यपाऽसुरे॥विष्णवेनमइतिविष्णुपूजयेत्॥नमस्तेरुद्रमन्यवइतिपरमे
ष्ठी॰गायत्री॰रुद्रोदे॰रुद्रार्चनेवि॰ॐनमस्ते॰ॐरुद्रायनमइतिरुद्रंपूजयेत्॥उदकोपस्प
र्शः॥तत्सवितुरितिविश्वामित्र॰गायत्री॰सवितादे॰सवितृपूजनेवि॰ॐतत्स॰ॐसूर्याय ३२
नमःइतिसूर्यंपूजयेत्॥मित्रस्यचर्षणीधृतइतिविश्वामित्र॰गायत्री॰मित्रोदे॰मित्रार्चनेवि॰॥

ॐमित्रस्यचर्षणीधृतोवोदेवस्यसानसि॥द्युम्नंचित्रश्रवस्तमं॥ॐमित्रायनमइतिमित्रंपू
जयेत्॥इमंमेवरुणइतिशुनःशेपऋ॰गायत्री॰वरुणोदे॰वरुणार्चनेवि॰ॐइमंमेवरुण
श्रुधीहवमद्याचमृडय॥त्वामवस्युराचके॥ॐवरुणायनमइतिवरुणंपूजयेत्॥ततःउत्था
य॥अदृश्रमस्यकेतवइतिसूर्य॰गायत्री॰सूर्योदे॰सूर्योपस्थानेवि॰अदृश्रमस्यकेतवोविर
श्मयोजनाँऽअनु॥भ्राजँतोऽअग्नयोयथा॥हꣳसःशुचिषदितिवामदे॰अतिजगती॰सूर्योदे॰सूर्योप
स्थानेवि॰॥ॐहꣳसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥नृषद्वरसदृतसद्व्योम
सदब्जागोजाऽऋतजाऽअद्रिजाऽऋतंबृहत्॥इतिमंत्रद्वयेनसूर्यमुपस्थायप्रदक्षिणमावृत्य।
ॐप्राच्यैदिशेनमः॥ॐइंद्रायनमः॥ॐआग्नेयैदिशे॰अग्नये॰दक्षिणायैदिशे॰यमाय॰नैर्ऋत्यैदि
शे॰निर्ऋतये॰प्रतीच्यैदिशे॰वरुणाय॰वायव्यैदिशे॰वायवे॰उदीच्यैदिशे॰सोमाय॰ईशान्यैदिशे॰

ईशानाय॰ऊर्ध्वायैदिशे॰ॐ ब्रह्मणे॰अवाच्यैदिशे॰अनंतायनमइतिदिशोदेवताश्चनमस्कृत्य।
तत:उपविश्य॥ॐ ब्रह्मणेनम:।अग्नये॰ पृथिव्यै॰ॐ षधिभ्यो॰वाचे॰वाचस्पतये॰विष्णवे॰
महद्भ्यो॰अद्भ्योनम:॥अपांपतये॰वरुणाय॰प्रत्येकमेताभ्यएकैकमंजलिंदद्यात्॥सवर्चसीति
परमेष्ठीप्रजापति॰त्रिष्टुप्॰त्वष्टादे॰मुखमार्जनेवि॰ॐ सवर्चसापयसासंतनूभिरगन्महिमसि
सासद्॰शिवेन॥त्वष्टासुदत्रोविदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टंमितिहस्ताभ्यांजलमादाय
मुखमार्जनं॥ततोदेवागातुविदइतिमनसस्पतिऋ॰विराडनुष्टुप्छं॰वातोदेवताकर्मांगदेवताविस
र्जनेवि॰ॐदेवागातुविदोगातुंवित्वागातुमित॥मनसस्पतइमंदेवयज्ञ॰स्वाहावातेधाःइत्यनेनवि
सर्जनं॥इतिस्नानांगजलदेवतापूजनं॥ ॥ततस्तीर्थंप्रक्षाल्यजलपात्रमादायतीर्थप्रदेशंप्रदक्षि
णीकृत्यगृहमागत्यविघ्नादिपूजनंकार्यं॥नृसिंहपुराणे॥जलदेवंनमस्कृत्यततोगच्छेद्गृहंबुधः॥

BBORI LIBRARY MEMORIAL

पौरुषेणसूक्तेनततोविघ्नंसमर्चयेत्॥वैश्वदेवंततःकुर्याद्बलिकर्मतथैवचेति॥व्यासेनतुवैश्वदे
वानंतरंदेवपूजोक्ता॥विधायदेवतापूजांप्रातर्होमादनंतरं॥पूर्वाण्हएवकुर्वीतदेवतानांचपूजन
मितिमरीचिवचस्येवकारश्रवणात्पूर्वाण्हेमुख्यकालः॥मध्यान्हस्तुगौणएव॥वैदिकस्तांत्रिको
मिश्रोविघ्नोवैत्रिविधोमखः॥त्रयाणामीप्सितेनैवविधिनाहरिमर्चयेत्॥किंच।पापक्षयेचमेकश्चि
द्भविष्यतीति॥तस्यवैपंचरात्रंतुनित्यंदविभविष्यतीति॥गृहीतविघ्नेशस्यवैष्णवस्येवव
क्ष्यते॥पंचरात्रविधिर्नान्येषांपुरुषसूक्तपूजातान्त्रिकमंतिर्गतब्रह्मादिपूजावत्सर्वसाधारणेति
तद्देवतात्रपंचरात्रविध्युपसंहारइतिसिद्धमवश्यंवैष्णवेनपंचरात्रविधिनाविघ्नपूजाकार्येति॥
स्मरंतिच॥प्रातस्तुपूजयेद्विघ्नंपंचरात्रविधानतः॥मध्यान्हेत्वर्चयेन्नित्यंसूक्तेनपुरुषस्यच॥त
थापंचरात्रविधिनायःसमाराधयेद्धरिं॥अक्षयंफलमाप्नोतिसपुमान्नात्रसंशयः॥गणपत्यादि

पूजायांतुतन्नियमाभावः॥ ॥अथपूजाविधिः॥तत्रभविष्यपुराणे॥सदायजंतियत्नेनसदादानंददं
३५ तिच॥सदाचवायुमभ्यासेनित्यंयेऽर्चंतिभास्करं॥नृसिंहपुराणे॥नहिलिंगात्परंकिंचित्पुण्यमभ्य
धिकंक्वचित्॥इतिविज्ञाययत्नेनपूजनीयःसदाशिवः॥तथा॥दुर्गार्चनरतोनित्यंमहापातकसंभवैः
॥दोषैर्नलिप्यतेवीरपद्मपत्रमिवांभसा॥देवपूजायाअकरणेदोषः॥कूर्मपुराणे॥योमोहादथवाल
स्यादकृत्वादेवतार्चनं॥भुंक्तेसयातिनरकेसूकरेष्विहजायते॥भविष्यपुराणे॥वरंप्राणपरित्यागः
शिरसोवापिकर्तनं॥नत्वसंपूज्यदेवेशंकेशवंकौशिकींशिवा॥कालिकापुराणे॥शिवंभास्करमग्निं
चकेशवंकौशिकीमपि॥मनसानर्चयन्यातिदेवलोकादधोगतिं॥तथा॥वरंदेहपरित्यागोवरंनरक
संभवः॥नत्वासंपूज्यभुंजीतदेवंवैपद्मसंभवमितिचवचननिश्चयाद्विष्णुदुर्गाशिवसूर्याग्निब्रह्मणांपूजा ३४
नित्या॥एतच्चनिरिक्तावेदिष्टदेवतातदात्मस्वाअपि॥एतच्चनिरिक्तदेवपूजातुनाकरणेप्रत्यवायजनि

का॥एतदकरणेदोषः॥कौर्मे॥योमोहादथवालस्यादकृत्वादेवतार्चनं॥भुंक्तेसयातिनरकान्कृमिर्तंचै
हजायते॥अतःप्रत्यवायपरिहारायाभीष्टप्राप्तयेचदेवेष्वेकतमस्याराधनंसर्वैरपिगृहस्थैरन्यैर
पियथाधिकारंकर्तव्यमितिसिद्धं॥गणेशपूजाकाम्यापिबहुभिरपिशिष्टैः सर्वदेशेक्रियते॥शिव
पूजालिंगे॥विष्णुपूजाशालग्रामेमहाफला॥तथाचकौर्मे॥तस्माद्ब्रह्मामहादेवो विष्णुर्विश्वे
श्वरःपरः॥एकस्यैवस्मृतास्तिस्रःतनवःकार्यवशात्प्रभोः॥तस्मात्सर्वप्रयत्नेनवंद्याः पूज्याश्च
सर्वदा॥यदीच्छेच्चलंस्थानंयत्तन्मोक्षाख्यमुत्तमं॥वर्णाश्रमप्रयुक्तेनधर्मेणप्रीतिसंयुतः॥पू
जयेद्भावयुक्तेनयावज्जीवप्रतिज्ञयेतिवचनैर्ब्रह्मविष्णुशिवानांमोक्षेछयायाव ज्जीवप्रतिज्ञया
पूजाविहितासान्वेदारब्धातदाऽग्नौचमध्येपिकार्येति॥तत्रस्थापनार्चनप्रकारः॥ॐनमोमध्य
गतेहरीनहरभूदेव्योहरौशंकरेभास्येनागसुतारवौहरगणेशाजांबिकाःस्थापिताः॥देव्यांविष्णु

हरैकदंतरवयोलंबोदरेजेश्वरेनार्यो:शंकरभागतोतिसुखदाव्यस्तासुतेहानिदा:॥अन्यत्राग्ने
३५ यादिक्रमेणस्थापनमुक्तं॥सूर्यैकदंताच्युतशक्तिरुद्राविघ्नेश्वरेशाद्रिसुतार्ककृष्णा:॥श्रीना
थविघ्नेशभगांबिकेशाश्चंडीशहेरंबपतंगकृष्णा:॥श्रीशंभुसूर्यारवुरथांबकृष्णा:॥प्रदक्षिणा
मध्यदिक्षुपूजा:॥स्वस्थानपा:सर्वमनोरथाप्तैअर्थैर्विनघ्नंतिपरंस्थाइति॥अत्रोभय
न:स्थापनक्रमेफलत:साम्यमेव।पूजातुगणपतिमारभ्य॥यत्रगणपतेर्मुख्यंतंत्रसूर्यमार

वि सू वि दे गं	शि वि दे सू	शि गं दे वि	वि शि दे सू	वि शि गं दे सू

भ्येतिज्ञेयं॥आदौसूर्यपूजाअंतेइष्टदेवतापूजा॥एतदुभयपूजयोर्मध्येअनियतक्रमेणावशिष्टपू ३५
जेतिग्राह्या:॥तदाहु:॥मुख्येपुष्पांजलिंकृत्वागणेशाद्यर्चनंभवेत्॥गणेशाएवमुख्यश्चेतत्रसू
र्यक्रमाद्भवेदिति॥एतद्व्याख्यानमुभयथाकुर्वंति॥मुख्येप्रथमतःपुष्पांजलिमात्रंकृत्वापश्चाद्

णेशाद्यर्चनंकृत्वामुख्यपूजेति॥अपरेतुपुष्पांजलिशब्देनपूजासमाप्तौयःपुष्पांजलिःसग्राह्यःते
नमुख्यदेवतापूजानंतरंगणेशाद्यर्चनमिति॥एतच्चस्वस्वगुरुसंप्रदायानुसारेणज्ञेयं॥पूजातु
कांडानुसमयेन॥कांडानुसमयेनात्रपूजाप्रोक्तामनीषिभिरित्युक्तानत्रनित्यपूजाशालग्रामे
मणोयंत्रेपाषाणादिप्रतिमायांवाकार्या॥तदुक्तंज्ञानमालायां॥गिरिजारत्नसौख्यायजातावि
घ्नपराःसुराः॥नघ्नंत्यचरितंदेव्याज्ञापोदन्योतिदारुणः॥पार्वतीज्ञापसंयुक्तादेवाअग्रमत्वमागताः
॥विघ्नानाशंकरेणापितथान्यैःसुरसत्तमैः॥संस्तुतावरदाजातापाषाणलेपिमासुराः॥स्वस्थाने
पूजयिष्यंतिपुरुषार्थंचतुष्टयं॥दातुंसमर्थामद्वाक्यादेषएववरोर्पितः॥तस्मात्पूजाविधातव्या
पाषाणप्रतिमासुचेति॥तथा॥नार्च्यागृहेऽग्रमजामूर्तिर्भ्रमतुरंगुलतोधिका॥नवितस्त्यधि
काधातुसंभवाश्रेयइच्छता॥गृहेलिंगद्वयंनार्च्यंगणेशान्वितयंनहि॥शक्तित्रयंतथाशंखंमत्स्या

दिदशकांकितं॥ द्वौशंभ्वर्चयेद्देवदशालग्रामशिलाद्वयं॥ द्वेचक्रेद्वारिकायास्तुनार्च्येसूर्यद्वयंतथा॥ शक्तित्रयंतथानार्च्यंगणेशत्रयमेवच॥ द्वौशंखौनार्चयेच्चैवभग्नांचप्रतिमांतथा॥ नार्चयेच्चतथाशंखंमत्स्यादिदशकांकितं॥ गृहेग्निदग्धाभग्नाश्चनार्चःपूज्यावसुंधरे॥ एतासांपूजनान्नित्यमुद्देगंप्राप्नुयाद्गृही॥ शालग्रामशिलाभग्नापूजनीयासशङ्खका॥ तस्माच्चविधिवद्देवान्पूजयेद्भक्तिभावतः॥ लभंतेवांछितान्कामानिहलोकेपरत्रचेति॥ उपचारास्तु॥ अष्टत्रिंशात्३८ षोडश१६ द्वादश१२ दश१० सप्त७ पंचवेति। तदुक्तं ज्ञानमालायां॥ अष्टत्रिंशात्षोडशा द्वादशादशसप्तपंचोपकारकाः॥ तान्विभज्यप्रवक्ष्यामिकेकेनेनेकृतैश्चकिंफलं॥ आसनंप्रथमंतेषामावाहनमुपस्थितिः॥ सान्निध्यमभिमुख्यंचसन्निरीकृतिःप्रसाधनं॥ अर्घ्यंच पाद्याचमनेमधुपर्कमुपस्पृहं॥ स्नाननीराजनंवस्त्रमाचामंचोपवीतकं॥ पुनराचमनं ३६

षेचदर्पणालोचनंततः॥ गंधपुष्पेधूपदीपौनैवेद्यंचततःक्रमात्॥ पानीयंतोयमाचामंहस्तवासस्ततःपरं॥ तांबूलमनुलेपंचपुष्पदानंपुनःपुनः॥ गीतवाद्यंतथानृत्यंस्तुतिंचैवप्रदक्षिणं॥ पुष्पांजलिनमस्कारावष्टत्रिंशत्समीरिताइति॥ मंत्रप्रकाशेपि॥ आसनंप्रथमंतेषुततःश्चावाहनंमतं॥ उपस्थानंचसान्निध्यमित्यादिना॥ पुष्पांजलिनमस्कारौविद्युद्प्रीत्येभवंत्यमी॥ त्रिंशाच्चाष्टौसमाख्याताउपचारामनीषिभिः॥ षोडशोपचारास्तु॥ आसनंस्वागतंचार्घ्यंपाद्यमाचमनीयकं॥ मधुपर्काचमनस्नानवसनाभरणानिच॥ गंधपुष्पेधूपदीपौनैवद्यंचंदनंतथा॥ तथा॥ आसनंस्वागतेवस्त्रमुपेयस्नातुदादश॥ अर्घपाद्याचमान्येवमधुपर्काचमनान्यपि॥ गंधादयोनिवेद्यंतांउपचारादशक्रमात्॥ गंधपुष्पेधूपदीपौनैवेद्यंपंचसंस्मृताः॥ सपर्यापंचधाप्रोक्तातासामेकांसमाचरेतइति॥ प्रयोगसारे विष्णुक्ता॥ अर्घ्यं

गंधंततःपुष्पमक्षतंधूपमेवच॥दीपोनैवेद्यसक्षांगीसपर्येत्यपरेजगुरिति॥षोडशोपचारादिपू
३७ जापक्षे॥वस्त्रालंकारयज्ञोपवीतजपस्तुतिपुस्तकवाचनवाद्यनृत्यगीतछत्रचामरा
दर्शादर्शनप्रणामाःस्वेच्छयाकार्याः॥स्नानवस्त्रनैवेद्येषु पुनराचमनीयदानं॥शालग्रामे
स्थिरप्रतिमायांचमावाहनविसर्जने॥उपचारांतर्गतेनतुतत्रापिकर्तव्ये॥पूजामंत्रास्तुमुख्याः
॥तदभावे॥ॐकारादिसमायुक्तंनमस्कारांतदर्पितं॥स्वनामसर्वदेवानांमंत्रइत्यभिधीय
तइतिवचनादोंकारादिनमोंततन्नद्देवतानामरूपः पुराणोक्तमंत्रोवाग्राह्यः पंचायतनदीक्षा
पक्षेकांडानुसमयेनैकदैवतापूजांसमाप्यदेवतांतरपूजेतिसकलदीक्षसंमतःपक्षः।प्राचीतु ३७
प्राकृत्यैवेतिकेचित्। इहदेवतापुरोभागः प्राचीत्याचार्याः तथाचागमे।देवतासाधकयोरंतः
पूर्वासादिगिहोच्यतइति।अन्यत्रापि।देवाग्रेस्वस्यवाप्यग्रेप्राचीप्रोक्तानुदेशिकैः॥प्राच्ये

वप्राचीत्वोद्दिष्टामुल्कातुदेवतार्चनमिति॥तंत्रांतरेपि।यत्रैवभावुनुस्तुवियसुदेतिप्राचीतितांवेदवि
दोवदंति॥तथापरापूजकपूज्ययोश्चसरागमज्ञाःप्रवदंतितांतु॥अन्यत्रापिद्वारपूजावसरे।देवस्य
मुखमारभ्यदिशंप्राचीप्रकल्पयेत्॥तदादिपरिवाराणामंगाद्यावरणस्थितिरिति॥तेनैवेनोदङ्मुख
पूजादावपिस्वाग्रभागस्यपूर्वत्वंप्रकल्प्यधर्मादिपूजनमंगादिपूजनंचेतिज्ञेयं॥इंद्रादिपूजनेतुप्रकृ
तैवप्राची॥तेनयंत्रादावपितंडुलेक्षुसरलेखनेअग्रदलात्प्रभृतिलेखनीयमितिज्ञेयं॥ ॥अथदेव
पूजाप्रयोगः॥तत्रादौशिष्टाचारानुगेनशापूजा॥तत्रसुप्रक्षालितपाणिपादःस्वाचांतःपूजास्थाने
अत्रैवयंत्रपूजा॥बिंदुत्रिकोणंरसकोणमष्टपत्रद्वयंषोडशपत्रमेकं॥षट्कोणरेखायुगुलेक्षुलेख्या
द्वारैर्युतंचारुधराचतुष्कं॥इतिशारदायांषोडशारदलमावशामागत्यश्रीपर्णादिप्रशस्तदारुनिर्मि
तेदेवपीठापेक्षयानीचेकुशोत्तरकंबलाद्यास्तृतेपीठेप्राङ्मुखउदङ्मुखोवोपविश्य।कामक्रोधम

यमात्सर्वाद्यकुर्वन्मौनीस्वस्यवामभागेवस्त्रपूतजलपूर्णपात्रं।दक्षिणतोगंधपुष्पादिपूजोपकर
णानिस्वपुरतःपूजाधारपीठादिप्रतिमांचयथासन्निवेशंस्थापयित्वाहस्तप्रक्षालनायस्वपश्चिमे
पात्रंस्थापयित्वाप्राणानायम्यगणेशादिपूजाधिकारसिध्यर्थंभूतशुद्धिमहंकरिष्यइतिसंकल्प्य
भूतशुद्धिंकुर्यात्॥भूतशुद्धिंविनाकर्मजपहोमार्चनादिकं॥भवेन्निष्फलंसर्वप्रकारेणाप्यनुष्ठि
तमिति॥सायथा॥मूलाधारादुत्थितावियुत्सहस्रप्रभाभासुरा विसतंतुसदृशीकुंडलिनीसुषु
म्नामार्गेणहृदयकमलंसमागतेतिभावयित्वातथाहृदयकमलस्थितःयोदीपकलिकाकारोजी
वोद्दादशांताख्यसहस्रसहस्रदलकमलंप्रतिनीतइतिविभाव्यसोहमितिमंत्रेणजीवात्मानंपर
मात्मनियोजयेत्॥ततःपादादिजानुपर्यंतंचतुरस्रंपीतंपृथिवीमंडलंतत्रपादगमनक्रियागंतव्यं
घ्राणपृथिवीब्रह्मनिवृत्तिसमानवायवःसंतीतिभावयित्वाॐह्रींब्रह्मणेपृथिव्याधिपतयेनिवृत्ति

कलात्मनेहुंफट्स्वाहेतिमंत्रंसमुच्चार्यतत्सर्वंकुंडलिनीद्वाराअमुलयंगतमितिभावयेत्॥ततोजा
न्वादिनाभिपर्यंतंशुक्लवर्णमर्द्धचंद्राकारमपांमंडलंतत्रहस्तदानादातव्यरसनाजलविष्णुप्रविष्टोरा
ताःसंतीतिभावयित्वाॐह्रींविष्णवेजलाधिपतयेप्रविष्टाकलात्मनेहुंफट्स्वाहेतिमंत्रमुच्चार्यत
त्सर्वंकुंडलिनीद्वाराऽग्नौलयंगतमितिभावयेत्॥ततोनाभ्यादिहृदयपर्यंतंत्रिकोणंरक्तवह्निम
ंडलंतत्रवायुविसर्गविसर्जनीयरूपचक्षुस्तेजोरुद्रव्यानाःसंतीतिभावयित्वाॐह्रींरुद्रायते
जोधिपतयेविद्याकलात्मनेहुंफट्स्वाहेतिमंत्रमुच्चार्यतत्सर्वंकुंडलिनीद्वारावायौलयंगतमि
तिभावयेत्॥ततोहृदयादिभ्रूपर्यंतंकृष्णंवर्तुलंषट्बिंदुलांछितंवायुमंडलंतत्रोपस्थानंदंतवि
षयस्पर्शःस्पृष्टव्यत्वगीशानशांत्यपानाःसंतीतिभावयित्वाॐह्रैंईशानायवागधिपतयेशांतिक
लात्मनेहुंफट्स्वाहेतिमंत्रमुच्चार्यतत्सर्वंकुंडलिनीद्वाराआकाशेलयंगतमितिभावयेत्॥ततोभ्रू

मध्यादिब्रह्मरंध्रपर्यंतंस्वस्थंवर्तुलमाकाशमंडलंतत्रवाक्कूवदनवक्त्र्यशब्दश्रोत्राकाशासदाशिवरू
त्यतीतप्राणाःसंतीतिभावयित्वा॥ॐ हौंसदाशिवायःकाशाधिपतयेशांत्यतीतकलात्मनेहुंफट्
स्वाहेतिमंत्रमुच्चार्यतत्सर्वमहंकारेकुंडलिनीद्वारालयंगतमितिभावयेत्॥ततोःहंकारोमहत्तत्वे
लयंगतःमहत्तत्वंमातृकारव्यशब्दब्रह्मस्वरूपहृल्लेखार्थभूतप्रकृतौलयंगतंप्रकृतिर्नित्यशुद्धबु
द्धयुक्तस्वभावेस्वप्रकाशेसत्यज्ञानानंदलक्षणेपरमकारणेपरब्रह्मणिलयंगतेतिभावयेत्॥
ततोदक्षिणकुक्षौ॥ब्रह्महत्याशिरस्कःसुवर्णस्तेयभुजद्वयःसुरापानहृदयोगुरुतल्पकटिद्वयस्त
त्संसर्गपदद्वंद्वोःगप्रत्यंगपातकउपपातकरोमारक्तश्मश्रुविलोचनःखड्गचर्मधरोःगुप्तपरिमाणोः
धोमुखःकृष्णवर्णःपापपुरुषोस्तीतिभावयित्वा॥नाभिमूलेषड्दिंदुमंडलेयंबीजमस्तीतिभाव
यित्वाततोवायुबीजंधूमंवंचंचलध्वजसंयुतंधूंशब्दयुतंसर्वशोषयामीशदैवतमितिध्यात्वापू

रकेद्वादशवारंषोडशवारंवातदावर्त्यतद्बीजोत्थवायुनासमीरःपापपुरुषःशोषितइतिभा
वयेत्॥ततोहृदयस्थितोरक्तत्रिकोणमंडलेविद्याकलायुतंरुद्रदैवतंरंबीजमस्तीतिभा
वयित्वा॥कुंभकेनचतुःषष्टिवारंरंबीजमावर्त्यतद्बीजोत्थाग्निनासमीरशुष्कपापपुरुषो
भस्मीभूतइतिभावयेत्॥ततोमस्तकस्थितवारुणमंडलेशुभ्रमर्द्धचंद्रसन्निभंसितपंकज
युग्मकंवरुणदैवतंवंबीजंध्यात्वातद्बीजनिःसृतामृतेननष्टस्मपिंडीभूतमितिभावयेत्॥ततो
आधारस्थितचतुष्कोणवज्रलांछितपृथ्वीमंडलेकठिनं॥पीतवर्णइंद्रदैवतंलंबीजमस्ती
तिभावयित्वातदुत्थकाठिन्येनशरीरंदृढंजातमितिभावयेत्॥ततोद्वादशांतास्थितवृत्ताका
शमंडलेशांत्यतीतकलायुक्तमुज्वलमाकाशदैवतहंसबीजंध्यात्वातदुत्थेनाकाशेनतस्मि
न्शरीरेःवकाशंभावयेत्॥एवंसर्वांगसंपन्नशरीरंध्यात्वापरमात्मसृष्टिस्थितिप्रलयादीनि

डाक्टर भाऊदाजी दास्कर मेमोरियल

यथास्थानंस्थितानीतिभावयित्वासोहमितिउच्चार्यपरमात्मनःसकाशात्जीवोहृदयकमल
मागतइतिभावयेत्इतिभूतशुद्धिः॥ ॥ततोगंहृदयायनमः।गींहृदिरसेस्वाहा॥गुंशिखा
यैवषट्॥गैंकवचायहुं।गौंनेत्रत्रयायवौषट्॥गः अस्त्रायफट्इतिषडंगंकृत्वा॥अर्घपा ४०
त्रंजलेनापूर्यतदुपरिहरतंदत्वाॐ गंगणेशायनमइतित्रिवारमभिमंत्र्यतेनोदकेनात्मा
नंपूजयेत्॥ततःसर्वस्थूलतनुंगजेंद्रवदनंलंबोदरंसुंदरंप्रस्यंदन्मदगंधलुब्धमधु
पव्रालोलगंडस्थलंरदं नाघातविदारितारिरुधिरैःसिंदूरशोभाकरंवंदेशैलसुतासु
तंगणपतिंसिद्धिप्रदंकर्मसु॥इतिध्यात्वा॥ॐगणेत्वाइहागच्छइहतिष्ठइहसन्निधे
हिइहसन्निरुध्यस्वममपूजांगृहाणइत्यावाहनादिकुर्यात्॥ततःॐगणेशायनमःइ ४०
दमासनमितिपुष्पैरासनं॥ततोगंधपुष्पोदकेनपाद्यं॥ततोर्घपात्रेजलगंधपुष्पाक्षत

यवकुशाग्रतिलसर्षपदूर्वाःप्रक्षिप्यॐ गंगणेशाय॰एषोर्घइतिदेवस्यमस्तकेऽर्घंदद्यात्॥
ततःपात्रांतरेतस्मिन्नेववाजातीलवंगकंकोलजलानितेषामभावेजलमात्रंवाप्रक्षिप्य
ॐगंगणे॰इदमाचमनीयमितिदेवस्यमुखेआचमनीयं॥ततस्ताम्रादिपात्रेवस्त्रपूतं
गंधादिजलंसाक्षतगंधपुष्पंगृहीत्वाॐ गंगण॰स्नानंकल्पयामीत्युत्कादेवोपरिक्षिपेत्
।पुनराचमनीयं॰ॐ गंगणे॰वस्त्रं॰पुनराचम॰ॐगंगणे॰यज्ञोपवी॰आचमनी॰वस्त्रार्थ
माक्षतान्समर्पयामि॥ततोगंधपुष्पंअक्षतावा।ततश्चंदनमगुरुंवादक्षिणकनिष्ठिकयाॐ गंगणे॰चंदनंस॰
ततःकनिष्ठिकांगुष्ठयोगेनगंधमुद्राप्रदर्शनं।ततःपुष्पं॰गंगणे॰देवस्यमस्तकेइत्थकृ२
उन्नानंसमर्पणं।तदभावेपत्रसमर्पणं।तदभावेफलं।तदभावेतृणं।तदभावेगुल्मं।तदभा
वेऔषधीः।तदभावेमानसीपूजा।ततोंगुष्ठानामिकासंयोगेनपुष्पमुद्राप्रदर्शनं।ततोधू

पंज्वलदंगारंनिधायतत्रघृतयुक्तंगुग्गुलंप्रक्षिप्यगंइत्यनेनप्रोक्ष्यनमइतिपुष्पेणसंपूज्य॥
वामहस्ततर्जन्याधूपपात्रंस्पृशन्वनस्पतिरसो॰अर्घपात्रजलमुत्सृज्यपुष्पांजलिंदत्वा।त
र्जन्यंगुष्ठसंयोगरूपांधूपमुद्रांप्रदर्श्यॐगजध्वनिघंटिकेमातःस्वाहाअनेनमंत्रेणघंटांसं
पूज्यतांवामहस्तेनवादयेत्॥जयमहागणपतेजयविघ्नौघनिवारणसमर्थजयभक्तकल्पा
णदायकइतिदेवगुणनामानिपठन्महागणपतिंधूपयेत्।ततोविषमब्रुवर्तियुक्तंदीपंप्र
ज्वाल्यदीपपात्रमभ्यर्च्यवाममध्यमयास्पृशन्सुप्रकाशोमहादीपःसर्वतस्तिमिरापहः॥सबाह्याभ्यं
तरंज्योतिर्दीपोयंप्रतिगृह्यतां॰सांगायसपरिवारायमहागणपतयेदीपंस॰अर्घजलमुत्सृज्य
पुष्पंदत्वाअंगुष्ठमध्यमासंयोगेनदीपमुद्रांप्रदर्श्यवामहस्तेनघंटांवादयेत्दक्षिणहस्तेनदी
पपात्रंगृहीत्वा।जय२हेरंबजय२गिरिजात्मजजय२गजवदनइतिपठन्प्रथमतोनीचैस्तरं

तरंकिंचिदुच्चैस्ततोपिकिंचिदुच्चैर्दवंनीराजयेत्॥ततःकांस्यारिपात्रेयथासंभवंविविधमन्नं
प्रक्षिप्यॐगणेशायनमइतिसप्तवारंप्रोक्ष्यधेनुमुद्रांप्रदर्श्यवामांगुष्ठेनस्पृशन्ॐगणे॰
सांगा॰सप॰नैवे॰इत्यर्घजलमुत्सृज्यपुष्पंदत्वावामहस्तेन घंटांवादयेत्जय२करुणानिधेजय२
महागणपतेजय२महादेवात्मजइतिपठन्दक्षिणहस्तेनग्रासमुद्रांप्रदर्शयेत्॥ततःज्ञातांशंनैवे
द्यादृहीत्वातीर्थकृन्नंकृत्वावक्रतुंडायनमइतिगणपतेर्वामभागेन्वंडांशंप्रक्षिपेत्।ततोंजलि
नानैवेद्यपात्रंगृहीत्वामस्तकपर्यंतंनीत्वामहाप्रसादइत्युक्त्वाभुन्वोदेशेस्थापयेत्॥ततोगणे॰
आचम॰ततोगणे॰पुष्पांजलिदानं।ततःप्रदक्षिणात्रयंयथाशक्त्यादंडवत्प्रणामः यथाशक्त्या
स्तुतिःततस्तांबूलनृत्यगीतछत्रचामरादर्शदर्शनानांययेष्टंयथासंभवमनुष्ठानं॥ततोमहा
गणपतेक्षमस्वेतिविसर्जनंगणानांत्वेतिवा।पूर्वोक्तप्रकारेणपूजनं॥ ॥अथसूर्यपूजा॥

तत्रदिवाचेत्प्राङ्मुखउपवेशनंसायंचेत्पश्चिमाभिमुखंरात्रौचेदुत्तराभिमुखं।अत्रकेवलंसूर्यपू
जाचेत्तत्रप्रथमतःस्नानमावश्यकं।तद्यथा।यथोक्तविधिनाचम्यसूर्यपूजांगस्नानमहंकरि
ष्येइतिसंकल्प्यनीराजनपूर्वकंसुविशुद्धयामृदाचजलेनशिरःप्रभृतिगात्राणिसंशोध्यस्ना
नवस्त्रंमृदाजलेनचसंशोध्यत्रिर्निमज्य।खंहृदयायनमइतिअभिमंत्रितेनजलेनद्विराचम्य
स्वशरीरेॐखखोल्कायनमइतिअनेनसप्ताक्षरेणत्रिवारंससवारंवासंप्रोक्ष्ययथाशक्त्याआ
वर्तितेमौनेनैवसूर्यायोपस्थानंकृत्वा अनेनैवसूर्यायपुष्पचंदनाक्षतमिश्रितेनजलेनार्घंदत्त्वा
स्वहृदयेसूर्यवन्मंत्रंध्यात्वायथाशक्तिजपित्वावस्त्रपूतंजलमादायसूर्यनामान्युच्चारयन्पू ४२
जास्थानमागछेदितिसूर्यपूजांगमेवस्नानं॥अथप्रयोगः॥पंचायतनदीक्षापक्षेतुप्रथा
नदेवतापूजांगमेवस्नानं।ततःसुप्रक्षालितपाणिपादःस्वासनेयथाकालंयथोक्तदिगभिमु

खमुपविश्यनवधावर्तितेनप्रणवेनप्राणायामंकुर्यात्॥ततःपूर्ववद्भूतशुद्धिंकुर्यात्॥पंचायतन
पक्षेतुनएवंभूतशुद्धिः ततःस्ववामेवस्त्रपूतजलपूर्णपात्रस्थापनं।दक्षिणेपुष्पादिपूजोपक
रणस्थापनंदीपस्थापनंयथास्थानंकर्तव्यं।ततःषडंगः।खंहृदयायनमः खोंशिरसेस्वाहा।
क्रोंशिखायैवंयंकवचायहुं।नंनेत्रत्रयायवंमःअस्त्रायफणवेनादित्यध्यानं॥मंत्राद्यक्षरेण
दीर्घभाजावाषडंगः ततस्तास्त्राद्यर्घपात्रंजलेनापूर्यतज्जलंसमाक्षेरेणप्रणवेनवात्रिवारमभि
मंत्र्यतेनोदकेनात्मानंपूजास्थानंपूजोपकरणानिचप्रोक्ष्यगंधपुष्पाभ्यांदेवधियात्मानंपूजयि
त्वाखकारादिभिःषड्भिःमंत्रैःषट्पत्रंपद्मसकर्णिकंकृत्वातदादित्यमंडलांतर्गतत्वेनध्यात्वातन्म
ध्येपद्मासनंपद्महस्तंद्विभुजंसप्ताश्वरथसंस्थंपद्मगर्भसमद्युतिंप्रभामंडलमध्यसंस्थंसहस्र
किरणोज्वलंसूर्यंध्यात्वावाहनं॥स्वांजलौपुष्पाणिगृहीत्वाऽदित्यमंडलात्स्वांजलावागतंविभा

व्यॐसूर्यइहागच्छइहतिष्ठइहसन्निधेहियावत्पूजासमाप्येतनावदत्रसन्निरुध्यस्वेयल्कआवाह
४३ नादिमुद्राःप्रदर्श्यस्वांजलिस्थानिपुष्पाणिमूर्तौस्थापयेत्॥ततःॐसूर्यायनमः पुष्पेणासनं।ततः
सूर्यायनमःपुष्पसहितजलेनपाद्यं।ॐसूर्यायनमःगंधपुष्पजलेनार्घमंत्रेणमूर्ध्न्यर्घदानं॥ततःसू
र्यायनमःमुखेआचमनीयं॥ॐसूर्यायनमःमंत्रेणस्नानं॥ॐसूर्यायनमःआचमनीयं।ततःवस्त्रेणप्रो
छ्यस्वतंत्रपूजावेत्तदापीठमध्येदेवस्यस्थापनं।पंचायतनपक्षेशंभुप्राधान्येपूज्यपूजकयो
र्मध्येप्राचींपरिकल्प्यआग्नेयांसूर्यस्थापनं॥विष्णुप्राधान्येनैऋत्यां।भवानीप्राधान्येनैर्क
त्यां।गणेशप्राधान्येवायव्यां।ततःसूर्यायनमःवस्त्रंनमःप्रतिपदार्थेजलदानं।आचमनीयं।तेनैवमंत्रे
णयज्ञोपवीतं।आचमनमःतत्तत्सदार्थीभावेपुष्पं॥ततःकनिष्ठिकयागंधमुद्राप्रदर्श्यनपूर्वकंगंध ४३
समर्पणं।मंत्रेणदेवस्यमस्तकेपृथगुत्तानपुष्पं॥मुद्राप्रदर्शनं।पुष्पाद्यभावेबिल्वपत्रभिन्नपत्रैः

पूजनं।तदभावेफलंतदभावेतृणं।तदभावेगुल्मं।तदभावेओषधीः।तदभावेमन्त्र्यामनोमयेरु
पचारैर्मानसीपूजा।ततःपूर्ववद्रूपं।ॐसूर्यायनमइतिमंत्रेणसमर्पयेत्॥अर्घपात्रजलपुरः
सरंधूपमुद्रांप्रदर्श्यमंत्रपूतांघंटांवादयन्जय२दिवाकरदारिद्र्यव्यसनध्वंसिन्जय२निखि
लव्याधिविध्वंसनजय२त्रैलोक्यप्रकाशकइतिगुणनामानिपठन्श्रीसूर्यंधूपयेत्॥ततःपूर्व
वद्दीपंप्रज्वाल्यदीपपात्रमभ्यर्च्यवाममध्यमयादीपपात्रंस्पृशन्सुप्रकाशो०सांगाय०सप०
अर्घजलपुरःसरंदीपमुद्रांप्रदर्श्यवामस्तेनघंटांवादयन्जय२महाराजजय२सकलतमो
विध्वंसनजय२त्रैलोक्यप्रकाशइतिजयशब्दंकुर्वन्नीचैरुच्चतरमित्येवंक्रमेणदेवंनीराजयेत्।त
तोनैवेद्यंप्रणवेनमंत्रेणसूर्यो०इत्यनेनवासप्रवारंप्रोक्ष्यधेनुमुद्रांप्रदर्श्यवामांगुष्ठेनस्पृशन्ॐ
सूर्यो०सां०स०नैवेद्यंस०अर्घजलपुरःसरंपुष्पंदत्वावामहस्तेनघंटांवादयन्जय२प्रभाकरक

रुणाम्नैजय२संसारभयनाशनजय२काम्यपेयइतिपठन्दक्षिणहस्तेनग्रासमुद्रां प्रदर्शयन्देवं
भोजयेत्॥ततोनैवेद्यात्किंचिदंशंगृहीत्वातीर्थकीर्त्तनंकृत्वाचंडांशवेनमइति सूर्यवामभागेचंडभागं
प्रक्षिपेत्॥ततोंजलिनानैवेद्यपात्रंगृहीत्वा महाप्रसादइतिउत्काशुचौदेशेस्थापयेत्।ॐसू
र्यायनमआचमनीयंसमर्पयामि।ॐसूर्यायनमःपुष्पांजलिःततःप्रणवंवामनासेमुच्चारयन्सप्तप्रदक्षिणाःकु
र्यात्॥यथाशक्तिदंडवत्प्रणामाःयथाशक्तिस्तुतिः॥ततःसूर्यक्षमस्वेतिविसर्जनं॥ ॥अथ
विष्णुपूजाविधिः॥सच्चपुरुषसूक्तविधानेन नरसिंहपुराणेउक्तः॥अग्नेर्वैष्णौहृदयेसूर्येस्थंडि
लेप्रतिमासुच॥षट्सुस्थानेषुचहरेरर्चनंमुनिभिःस्मृतं॥पुरुषोयोजगद्बीजमृषिर्नारा यण
यणःस्मृतः॥आद्यैर्वाहयेद्देवमृचातुपुरुषोत्तमं।द्वितीययासनंदद्यात्साद्यंचैवतृतीयया॥च
तुर्थ्यार्घ्यंप्रदातव्यःपंचम्याचमनीयकं॥षष्ठ्यास्नानंप्रकुर्वीतसप्तम्यावस्त्रमेवच॥यज्ञोप

वीतमष्टम्यानवम्यागंधमेवच॥दशम्यापुष्पकंदद्यादेकादश्यातुधूपकं॥द्वादश्यादीपकंदद्या
त्रयोदश्यान्वरुंतथा।चरुर्नैवेद्यं चतुर्दश्यांजलिंदद्यात्संचदश्यांप्रदक्षिणां।षोडश्योद्वासनं
चैवशेषकर्माणिपूर्ववत्।स्नानेचवस्त्रेनैवेद्येदपादाचमनीयकं॥तत्रसुप्रक्षालितपाणिपादः
स्वाचांतःपूतस्थानमागत्यकुशाद्यरुतश्रीपर्ण्याद्यासनेदिवाचेत्पूर्वाभिमुखःरात्रौचेदुत्त
राभिमुखःउपविश्योत्ततःप्राणायामः।ऋतशुद्धिःपूर्वंकृत्वाचेन्नपुनःकरणं।ततःस्ववामे
वस्त्रपूतजलकलशस्थापनंदक्षिणेगंधपुष्पादिपूजोपकरणस्थापनं।दीपस्थापनं।स्व
पृष्ठभागेहस्तप्रक्षालनार्थंपात्रस्थापनं।ततःपुरुषसूक्तस्यनारायणऋषिःआद्यानांपं
चदशानांमनुष्टुप्।षोडश्यास्त्रिष्टुप्।जगद्बीजं।पुरुषोदेवता॥अंगन्यासेवि।ॐगोविंदायनमः
अंगुष्ठाभ्यान्नमः॥महीधरायतर्जनीभ्यां।हृषीकेशायमध्यमाभ्यां।त्रिविक्रमायअना।वि

स्त्रवे०कनिष्ठि०माधवाय०करतलकरपृष्ठाभ्यां०नतोंगन्यासः।वामदक्षहस्तवामदक्षपादवाम
दक्षजानुवामदक्षकटिनाभिहृदयकंठवामदक्षबाहुमुखनेत्रद्वयमूर्द्धसुसहस्रशीर्षेत्यादिषोड
शकंडिकान्यसेत्।यथा।सहस्र०सव्यहस्ते।पुरुषए०दक्षहस्ते।एतावानस्येतिसव्यपादे
त्रिपादूर्ध्वइतिदक्षपादे।विराडितिसव्यजानुनि।तस्माद्यज्ञादितिदक्षजानुनि।तस्माद्य
दितिवामकट्यां।तंयज्ञमितिनाभौ।यत्पुरुषमितिहृदि।ब्राह्मणोस्येतिकंठे।चंद्रमाइतिस
व्यबाहौनाभ्याआसीदितिदक्षिणबाहौ।यत्पुरुषेणहविषेतिमुखे।सप्तास्येत्यस्यांशे
यज्ञेनेतिमूर्ध्नि।ततःषडंगः।ब्राह्मणोस्यमुखमासीत्०हृदयाय०चंद्रमामनसो०शिरसे
नाभ्याआसीदंतरिक्षं०शिखायै०।यत्पुरुषेणहवि०कवचाय०सप्तास्यास०नेत्रत्रया०अ
स्त्रेणयज्ञमय०अस्त्रायफट्॥केषांचिन्मतेअङ्गन्यासःसंभृतइतिषड्भेनषडंगन्यासोभवति॥

ततोयथास्वदेहे०गंन्यासःएवमेवदेवस्यषोडशाग्निरंगन्यासःकर्तव्यः॥ततस्तास्मात्यर्घपात्रंजले
नापूर्यतज्जलंप्रणवेनविष्णवेनमइत्यनेनवाग्निवारमभिमंत्र्यतेनजलेनचात्मानंयागभूमिंपूजो
पकरणानिसंप्रोक्ष्यसोहंमितिपूजनीयदेवतात्मनोरैक्यंभावयित्वागंधपुष्पाभ्यांदेवधिया०त्मा
नंपूजयेत्।ततः।ध्येयःसदासवितृमंडलमध्यवर्तीनारायणःसरसिजासनसन्निविष्टः।।
केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः॥एवंध्यात्वासामान्या
र्घोदकेनमथमतस्त्रिकोणं॥तद्बहिःषट्कोणंतद्बहिश्चतुरस्रमितिमंडलत्रयंकृत्वातदुपरिशंख
मुद्रांप्रदर्श्य।आग्नेयेहृदयायनमः॥नैर्ऋत्येशिरसे०वायव्येशिखायै०ईशान्येकवचाय०म
ध्येनेत्रत्रयाय०सर्वदिक्षुअस्त्राय०इतिगंधपुष्पैःक्रमेणसंपूज्य।ॐविष्णवेनमइतिमूलमं
त्रेण०यज्ञेनयज्ञमयजंतइत्यनेनमंत्रेणवाशंखंप्रक्षाल्यॐअग्निमंडलायदशकलात्मनेश्रीवि

ष्वर्घपात्रासनाय नमइतिमंडलोपरि आधारंप्रतिष्ठाप्य। धूम्रानीलारक्तापिंगलाविस्फुलिंगि
नीज्वालिनीनिःपक्षिकाह्व्यवाहननिकाकव्यवाहननिकारौद्रीसंहारिणीभ्यो नमइतिप्रत्ये
कंवाआधारोपरिवन्हेर्दशकलागंधपुष्पैःसंपूज्ययज्ञेनयज्ञमयजंतेतिरं खंसंशोध्य
सूर्यमंडलायद्वादशकलात्मने श्रीविष्णुरर्घपात्रायनमइतिरं खंआधारोपरिनिधाय।तपि
नीतापिनीसंधिनीबोधिनीकालिनीशोषिणीवारणीआक।र्षिणीवैष्णवीविष्णुविद्याज्योत्स्ना
हिरण्यानमइतिप्रत्येकंवासूर्यस्यद्वादशकलाः रं खेसंपूज्यशुद्धोदकेनरं खंसंपूर्यसोम
मंडलायषोडशकलात्मने श्रीविष्णूर्घामृतायइतिरं खस्थजलंसंपूज्यअमृतामानसातु
ष्टिपुष्टिप्रीतिरीतिलज्जाश्रीसुधात्रिज्योत्स्नाहंसवर्तीछायापुराणीवामाज्येभ्योनम
इतिप्रत्येकंवासोमस्यषोडशकलाअर्घजलेपूजयेत्॥ततःगंगेचयमुनेचैवगोदावरिसर

स्वति॥नर्मदासिंधुकावेरिजलेस्मिन्सन्निधाभवेतितीर्थावाहनं।गंधपुष्पैरर्चनं।ततःरं खोप
रिहस्तंदत्वाॐविष्णवेनमइतिजलाधेनुमुद्रांप्रदर्श्यआरात्रिकवत्करौसंयोज्यपरमीकरणं
कुर्यादितिरं खप्रतिष्ठा॥ततःआवाहनमुद्रयास्वांजलौपुष्पाणिगृहीत्वाॐविष्णवेनमइ
त्युच्चार्यस्वस्थानात्सुषुम्नामार्गेणब्रह्मरंध्रद्वारावामनासापुटमागतंतेजोध्यात्वाननः
स्वांजलिस्थपुष्पमागतमितिध्यात्वाॐसहस्रशीर्ष॰मुलमितिपठित्वा॥ॐविष्णोइहागच्छ
इहतिष्ठइहसन्निधेहियावत्पूजासमाप्येतनावदत्रसन्निरुध्यस्वेत्युक्त्वास्वांजलिस्थानि
पुष्पाणिमूर्त्यादौस्थापयेत्।ततःआवाहनादिमुद्राणांप्रदर्शनं।ॐविष्णवेनमइतिप्रतिपदार्थे
पुष्पांजलिदानं।ततःपुष्पेण।पुरुषएवेदं॰विष्णवे॰आसनं।तास्रादिपात्रेसजलदूर्वाविष्णुक्रां
तात्रयामाकपद्मानिप्रक्षिप्यतदग्रेवेतनद्रावानांकुशातत्रात्रंहस्ताभ्यांगृहीत्वा॰एतावानस्ये

तिविघ्नवे पाद्यंपादयोः॥तस्मिन्नेव पात्रेसजलपुष्पाक्षतयवकुशाग्नितिलसर्षपदूर्वाः प्रक्षिप्यतदभावेतद्भावनांकृत्वाहस्ताभ्यामर्घ्यपात्रंगृहीत्वा।त्रिपादूर्ध्वेतिविघ्नवेऽर्घमितिदेवमूर्ध्निअर्घदानं।तस्मिन्नेवपात्रेशुद्धोदकेनजातीफललवंगकंकोलयुक्तेन।ततोविघ्नजायतेतिआचमनीयंमुखे।ततःस्नानार्थंजलंगृहीत्वानत्राक्षतगंधपुष्पाणिप्रक्षिप्यतदभावेभावयित्वापात्रंहस्ताभ्यामादायतस्माद्यज्ञादितिविघ्नवेस्नानंविघ्नवेऽदमाचमनीयं।ततःशंखेयथाशक्तिगंधतोयादिभिरभिषेकःपुनराचमनीयं।ततोवस्त्रेणशरीरप्रोछंतंकृत्वाप्रतिमादिकंस्वतंत्रपूजापक्षेपीठमध्येस्थापयेत्॥पंचायतनपक्षेशंभुप्राधान्येऽग्नाग्नेस्थापनं।सूर्यप्राधान्येनैऋत्यां।दूर्गाप्राधान्येईशान्यां॥एवंगणेशाप्राधान्येपिततःपीनकौशेयंतदभावेकार्पासममलंकेशादिभिरदूषितंवस्त्रं।तस्माद्यस्मात्स ४७

र्वेतिविघ्नवे॰वस्त्रं॰आचम॰ततःतस्मादस्वाअजायंतेतिविघ्नवे॰यज्ञोपवीतं।आचम॰तन्नदुपचाराभावेपुष्पं।ततःकनिष्ठिकयाचंदनकर्पूरकालागरुभिर्मिश्रितैरेकेकेनवासंपादितंशंखपात्रस्थितंगंधमादाय।तंयज्ञंबर्हिषीतिगंधं॥गंधमुद्राप्रदर्शनं॥ततःपुष्पमुद्रापुरःसरंयत्पुरुषंव्यदधुरितिविघ्नवे॰उन्नानपुष्पं।तदभावेतुलस्यादिपत्रंतदभावेपल्लवःतदभावेजलंतदभावेमानसीपूजा।अपामार्गभृंगराजखदीरशमीदूर्वाकुशदमनकबिल्वतुलसीपत्राणांपुष्पतुल्यत्वं।पूर्वपूर्वपत्रापेक्षयोत्तरोत्तरपत्रैःपूजायांफलाधिक्यं॥ततःधूपपात्रेधूमरहितमग्निंप्रक्षिप्यतदुपरिसाज्यंगुग्गुलंप्रक्षिप्ययज्ञेनयज्ञमयजंतेतिप्रोक्ष्यनमःपुष्पेणसंपूज्यवामतर्जन्याधूपपात्रंस्पृशन्नाप्यायस्वेतिमंत्रेणधूपमभिमंत्र्यनमःपुष्पेणसंपूज्यवामतर्जन्याधूपपात्रंस्पृशन्नाप्यायस्वेतिपठित्वा।सांगायसपरिवारायविघ्नवेधूपंस॰शंखजलमुत्सृज्यधूपमुद्रांप्रदर्श्यपुष्पंदत्वाॐगजध्वनिघंटिकेमातःस्वाहाअनेनमंत्रेणपूजितांघंटां

वामहस्तेनवादयन्जय२विघ्नोमधुकैटभारेजय२त्रैलोक्यप्रतिपालकजय२दीनानाथसमुद्ध
रणइतिगुणनामानिकीर्तयन्श्रीमहाविष्णुंध्यापयेत्॥ततोविषमवर्तियुक्तंदीपंघृतेनतिल
तैलेनवायथासंभवंप्रज्वाल्य ॐ विष्णवे०इतिदीपपात्रंप्रोक्ष्याभ्यर्च्यवाममध्यमयास्पृशन्
चंद्रमामनसोइतिपठित्वासांगा०स०विष्णवेदीपंसमर्पयामिदीपमुद्रांप्रदर्श्यपुष्पंदत्वावाम
हस्तेनघंटांवादयन्दक्षिणहस्तेनदीपपात्रंगृहीत्वाजय२लक्ष्मीपतेमहापुरुषजय२भक्त
जनवल्लभजय२अनवरतभागवतपरायणइतिपठन्प्रथमतोनीचैस्ततः किंचिदुच्चैरितिप
रमेश्वरंनीराजयेत्। ततः कांस्यादिपात्रेविविधमन्नंगृहीत्वाॐ विष्णवेनमइतिसप्तवारं
प्रोक्ष्यधेनुमुद्रांप्रदर्श्यवामांगुष्ठेनसंस्पृशन्ॐ नाभ्या आसीदंतरिक्षंसांग०विष्णवेनैवेद्यं॥
श्रींरवजलमुत्सृज्यपुष्पंदत्वावामहस्तेनघंटांवादयन्जय२मुरारेकौस्तुभोरस्कसकलनिगम

वर्णितगुणगणनिखिललोकपावनतीर्थास्यस्मदितिगुणनामानिकीर्तयेत्ततःनैवेद्यांछतांश्रींचंडा
श्रींगृहीत्वातीर्थकूंन्नंकृत्वाविष्वक्सेनायुक्तेभ्यः।बलिर्विभीषणोभीष्मोप्रल्हादोनारदोध्रुवं॥क
पिलश्चांबरीषश्चवसुर्वायुसुतस्तथा॥विधक्सेनोद्धवोक्रूरःसनकाद्यामहर्षयः।वासुदेव
म।सादोयंसर्वगृह्णंतुवेष्वक्सेनइतिविष्वक्सेनवामभागेप्रक्षिपेत्। इतिप्रसादंदत्वाहस्तंप्रक्षालयेत्।
ततोंजलिनानैवेद्यपात्रंगृहीत्वामस्तकपर्यंतंनीत्वामहाप्रसादंइत्युक्त्वाशुचौदेशेस्थापयेत्।
तीर्थपात्रेप्येवमेवकुर्यात्ततः पुनराचम्य ततःपुष्पांजलिंगृहीत्वायत्पुरुषेणहविषेतिविष्ण
वे०पुष्पांजलिंस०देवस्यमूर्ध्निततः ससास्या०पठित्वाप्रदक्षिणाचतुष्पृथं॥ततोयथाशक्ति
अष्टांगप्रणामःततः सहस्रशीर्षेतिषोडशभिः षोडशपुष्पाणि॥ततः पुरुषसूक्तेनस्तुतिः।
जितंतेपुंडरीकाक्षनमस्तेविश्वभावन॥नमस्तेस्तुहृषीकेशमहापुरुषपूर्वजेतिस्तुत्वा॥जि

तंतेइति मंत्रेणशिरस्यापुष्पाणिमूर्धनि।क्षिप्तान्येतानिपुष्पाणिस्वयंगृण्हातिकेशवः।य
त्नोपपद्यतेकिंचिन्नध्यायेन्मननसेवतु॥संपद्यतेतुतत्सर्वं देवदेवस्यचक्रिणः।ततःप्र
दक्षिणंकृत्वाउपविश्यसमाहितः।बध्वामुकुलमुद्रांतुललाटोपरिसंस्थितां।मुकुलमुद्रा
कमलाकृति॥जप्त्वाचैवयथाशक्त्यासूक्तंदेवेनियोजयेत्॥नदेतत्प्रयतोभूत्वाजितंतेइ
तिकीर्तयेत्।विसर्जनमनेनैवकर्मांतेकारयेद्बुधः॥जानुभ्यांधरणींगत्वामूर्ध्नाहरिरथोव
देत्॥भगवन्देवदेवेशपुरुषोत्तिसनातन॥क्षमस्वदेवदेवेशमत्कृत्यतुविशेषतः॥ज्ञाना
ज्ञानतोवापियन्न्यूनादिकृतंमया॥सर्वसंपूर्णमेवास्तुत्वत्प्रसादाज्जनार्दन॥ततस्तां ४९
बूलं।वाद्यगीतनृत्यछत्रचामरादर्शदर्शनानियथेछंयथासंभवंमनुष्ठेयानि॥अज्ञाना
त्थवाज्ञानादशुभंयन्मयाकृतं॥क्षंतुमर्हसितत्सर्वदास्येनत्वद्गृहाणमांइतिप्रार्थना॥त

तःॐयतेनयजेतिपठित्वाभगवन्विष्वोसमस्वेतिविसर्जनं॥एतदावाहनंचशालग्रामे
स्थिरप्रतिमायांचनकर्तव्यं।ततःकायेनवाचामनसेंद्रियैर्वाबुध्यात्मनावानुसृतःस्वभा
वात्।करोमियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयामि॥यस्यस्मृत्यानामोक्त्या
तपोयज्ञक्रियादिषु।न्यूनंसंपूर्णतांयातुसद्योवंदेतमच्युतं॥इतिपुरुषसूक्तविधिनाद्व
सिंद्वपुराणोक्तविष्णुपूजाप्रयोगः॥ततश्चरणोदकप्राशनं॥विष्णोःपादोदकंपूण्यंतुलसी
दलमिश्रितं॥भक्त्यापीतंत्रिकालंतुहत्यांकोटिविनाशनं॥त्रिसंध्यंविनापात्रतुलसीं
प्राशयेद्यदि॥येपिबंतिनरानित्यंशालग्रामशिलाजलं॥पंचगव्यसहस्रेसुप्राशितैः
किंप्रयोजनं॥पीतंयेनसदाविष्णोःशालग्रामशिलाजलं॥छिन्नस्तेनमहासेनगर्भ
वासःसुरारुणः॥विलयंयांतिपापानिपीतपादोदकेहरेः॥अकालमृत्युहरणंसर्वापद्व

१ सर्वसंप्राप्तिकरणं विष्णोपादोदकंभजे ॥ पादप्रक्षालनंवारि विष्णोरमिततेजसः ॥ १

वनाशनं ॥ सर्वपापप्रशमनं प्राशयामिपुनातुमां ॥ इतिमंत्रः ॥ एतत्पादोदकंपानमेकादश्यु
पवासेपिविहितत्वाद्भुतशेषाचमनंकर्मांगभक्षवदविरुद्धं ॥ अस्यच । तुलसीभक्षविहितं
हरेर्दिनमुपोषितः ॥ यथोक्तफलदंतस्मा न्तर्पयंसदलंजलमितिव्रतांगत्वमपिकेचित्स म
रंति ॥ इतिविष्णुपूजा ॥ ॥ अथशिवपूजाप्रयोगः ॥ स्वशाखोक्तस्नानानंतरंप्राणाया
मंकृत्वामूलमंत्रंमनसाविचिंत्यपरमेश्वर-चरणनिसृतजलेनस्नातोहमितिभावयेत् ॥ शै
वमभ्यंतरंस्नानंबाह्यस्नानंसमाचरेत् ॥ तत्रप्रथमंप्रणवेनप्राणायामः । ॐ नमः शिवा
येत्यस्यवामदेवऋषिः पंक्तिछं० ईशानोदे० न्यासेवि० इत्यार्षादिस्मृत्वा । ॐ हृदयाय० ५०
नंशिरसे० मः शिखायै० शिकवचा० वानेत्रत्रयाय० यअस्त्राय० इतिषडंगंकृत्वाप्रणव
मुच्चार्यसूर्यमंडलादंकुशमुद्रयातीर्थमाकृष्यवमित्यनेनांभस्संप्लाव्य । शिवइत्यनेना

वगुंठनमुद्रया ऽवगुंठ्य यंइत्यनेनसंरक्ष्यनमः शिवायेत्यनेनैकादशावारंतज्जलमभिमंत्र्यतस्मि
न्जलेनिमज्यनिमग्नएवमहादेवंध्यायन्यथाशक्तिमंत्रंजपेत्ततउन्मज्यावश्यपूर्ववत्षडंगंकृ
त्वाकलशमुद्रयामूलमंत्रेणसप्तवारंद्वादशवारंवात्मानमभिषिंचेत्ततोविप्र पादोदकग्रह
णपूर्वकंविष्णुपादोदकंपीत्वामस्तकेधारयेत् । ततःपादौजलस्थलेचकृत्वाद्विराचम्यव
स्त्रधारणतिलकधारणत्रिपुंड्रधारणानिकृत्वामंत्रसंध्यांकुर्यात् ॥ तद्यथा ॥ प्राणायाम
त्रयंकृत्वातीर्थजलमादाय मूलमंत्रेण त्रिवारमभिमंत्र्यआचमेत् । एवंपुनर्वीरद्वयं ॥ ततस्ती
र्थजलंदक्षिणहस्तेनवा महस्तेगृहीत्वा नासिकासमीपंधृत्वाइडयादेहमध्येआकृष्यपापसं
चयंसालनेनकृष्णवर्णंतदुदकंदक्षिणनासिकयाविरेचनंभावयित्वापुरःकल्पितवज्रशिला
यांफडित्यस्त्रमंत्रेण महाशिपदित्यघमर्षणंकृत्वापुनरंजलिनाजलंगृहीत्वासूर्यमंडलस्थाय

देवायार्घकल्पयामीति ॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रः प्रचोदयादि[illegible]गा
यत्रा ॥ ॐ नमः शिवायेतिवाग्निरर्घंदत्वासूर्यमंडलमध्यस्थंमहादेवंध्यायन्मूलमंत्रेणो
पस्थायपूर्वोक्तरुद्रगायत्रींमूलमंत्रंवाअष्टाविंशतिवारंजपेत् । ततोमूलमंत्रोच्चारणपूर्वकं
महादेवंतर्पयामीत्यष्टाविंशतिवारंतर्पयित्वापुनः सूर्यमंडलदेवतांविचिंत्यसूर्यमंत्रेणसूर्या
यार्घंदत्वासंहारमुद्रयातीर्थंविसृज्यसूर्यादिकंनमस्कृत्वाद्वौवाचमनंकुर्यात् । तद्यथा ॥ ॐ
आत्मतत्वायहांस्वधा ॥ ॐ विद्यातत्वायहींस्वधा ॥ ॐ शिवतत्वायहुंस्वधाइतिक्रमेणएकैक
मंत्रेणएकैकवारंवीक्षितजलेपानं । ततः पूजास्थानं प्रतिगत्वाकुशाद्यास्तृतश्रीपर्ण्यादिषु
भासनेउदङ्मुखउपविशेत् । ततःप्रणवेनप्राणायामः कृतशुद्धिः पूर्वंकृताचेन्नपुनःकरणं । त
तःस्ववामभागेवस्त्रपूतजलपूर्णोदकपात्रस्थापनं । दक्षिणेगंधपुष्पादिपूजोपकरणस्था

MEMORIAL

पनं । स्वदक्षतः हस्तप्रक्षालनार्थंपात्रस्थानं । स्वपुरतः पूजापीठादिस्थापनं । ॐ नमः शि० वा०
य० ईं अंगन्यासेविनि० षडंगंकृत्वांऽगुलिन्यासंकुर्यात् । यथा । नंसद्योजातायनमः अंगुष्ठयोः
मंवामदेवायनमः तर्जन्योः । शिंअघोरायनमः मध्यमयोः । वांतत्पुरुषायनमः अनामिकयोः ।
यंईशानायनमः कनिष्टिकयोः इत्यंगुलिन्यासंकृत्वाध्यानंकुर्यात् । ध्यायेन्नित्यंमहेशंरज
तगिरिनिभंचारुचंद्रावतंसंरत्नाकल्पोज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं ॥ पद्मा
सीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्वरूपंनिखिलभयहरंपंचव
क्त्रंत्रिनेत्रं ॥ १ ॥ ततः आवाहनमुद्रया ॐ महादेवायनमइत्युच्चार्यस्वस्थानात्सुषुम्नामा
र्गेणब्रह्मरंध्रद्वारानासिकारंध्रान्निर्गतंचैतन्यमंजलिस्थपुष्पसंचये आगतंध्यात्वाॐ
नमः शिवायेत्युच्चार्यॐ महादेवइहागच्छइहतिष्ठइहसंनिधेहि । इहसन्निरुध्यस्वइत्यु

ल्कास्वांजलिस्थपुष्पंलिंगेप्रतिमायांस्थापयेत्। ततः आवाहनादिमुद्राप्रदर्शनं॥ इतःआरभ्य
प्रत्युपचारंपुष्पंजलोत्सर्गश्च्य। ततःसतोयपुष्पेणमंत्रेण ॐमहादे॰आसनं। ततस्ताम्रादिपा
त्रेजलदूर्वाविष्णुक्रांताश्यामाकपत्रानिप्रक्षिप्यतदभावेभावनांकृत्वातत्रहस्ताभ्यांगृहीत्वा॥
ॐनमः॰पठित्वामहादेवायइदंपाद्यंस॰।आच॰तस्मिन्नेवपात्रेजलगंधपुष्पाक्षतयवकुशति
लसर्षपदूर्वाःप्रक्षिप्यभावनांकृत्वावा॥ॐनम॰अर्घ्यं॰पुनस्तत्रैवसजलजातीफललवंगकं
कोलानिप्रक्षिप्य॥ॐनम॰आ॰सुगंधतैलेनदेवमभ्यज्ययवपिष्टमिश्रितलोध्रपिष्टेनोद्वर्त
नंमहाफलं। ततःस्नानार्थंसाक्षतगंधपुष्पजलंपात्रेगृहीत्वाॐनमःमहा॰स्नानं॰पंचामृतं
सत्वेतन्नमंत्रैस्तत्तद्द्रव्येणस्नपयित्वाशुद्धोदकेनप्रक्षालनं। तदंतेशुद्धजलेनस्नानं। ततोय
थाशक्ति अभिषेकः॰पुनराच॰ततोदेवशरीरंवस्त्रेणप्रोंछ्य महादेवस्यप्राधान्यंचेत्तदामध्ये।

विष्णुसूर्ययोःप्रधान्येईशान्यां।देवीगणेशयोःप्राधान्येवायव्यांस्थापयेत्॥ततःवस्त्रं॥ॐनमः
महा॰स॰आच॰यज्ञोपवीतंतेनैवमंत्रेण॥आ॰वस्त्राद्युपचाराभावेऽक्षतंपुष्पंवा। ततश्चंद
नंकनिष्ठिकयागंधमुद्रापुरःसरंतेनैवमंत्रेणगंधं॥ततःस्रेनैवमंत्रेणपुष्पमुद्रानं।पुष्पंतु
बहुवारं।विहितपत्रपुष्पयोरभावेनिषिद्धवर्जमन्यदपिपुष्पंदेयं॥ततःधूपपात्रेधूमरहि
तमग्निंसाज्यगुग्गुलेनसंयुज्य।यंइत्यनेनपात्रंप्रोक्ष्यनमइत्यभ्यर्च्यतर्जन्यास्पृशन्ॐ
नमःसांगायसपरिवारायमहादेवायधूपंस॰शंखजलमुत्सृज्यधूपमुद्रांप्रदर्श्यपुष्पंद
त्वा।गजध्वनिघंटिकेमातःस्वाहेतिमंत्रेणपूजितांघंटांवामहस्तेनवादयन्जय२महारुद्र
महारौद्रभद्रावतारजय२वीरकपालमालाधरजय२विकराट्टहासजय२मृत्युंजयत्र्यं
बकत्रिपुरांतकइतिगुणनामानिकीर्तयन्देवंधूपयेत्॥ततोविषमवर्तियुक्तंदीपंघृतेनतिल

तैलेनवाप्रज्वाल्यॐनमःमहा०पात्रंप्रोक्ष्याघ्यंचवाममध्यमयास्पृशन्ॐ०नमःसांगा०सप०महा
५२ दे०दीपंस०शंखजलमुत्सृज्यमुद्रांप्रदर्श्यपुष्पंदत्वाघंटांवादयन्जय२महादेवत्रिपुरांतकजय२
गिरिजाधिपतेजय२कपालमालांकितशेखरजय२हरिकापापहार्यार्धकायइतिगुणनामा
निकीर्तयन्दक्षिणहस्तगृहीतंदीपेनदेवंनीराजयेत्॥ततःकांस्यादिपात्रेविविधमन्नंगृही
त्वामहा०ससवारंप्रोक्ष्यधेनुमुद्रांप्रदर्श्यवामांगुष्टेनस्पृशन्सांगायस०महादे०नैवेद्यं०शंख
जलमुत्सृज्यपुष्पंदत्वावामहस्तेन घंटांवादयन्दक्षिणहस्तेनग्रासमुद्रांप्रदर्शयन्जय२ई
श्वरमहादेवजय२भूतपतेहरजयाशेषमहाबाहोमोचयत्रिपुरांतकजय२शिवशर्वत्र्यक्ष ५३
रक्षार्चितांप्रेस्मरहरमृडशंभोधूर्जटेव्योमकेशवरदकुरुकृपांमेमोहविध्वस्तबुद्धेर्विहित
विविधमूर्तेभूयएवंनमस्तेइत्यादिजयाशंसनंकुर्यात्ततोनैवेद्यान्तांशंगृहीत्वातीर्थ

क्लीन्नंकृत्वामहादेवशोषकायचंडीश्वरायनमइतिमहादेवादुत्तरतःक्षिपेत्। बाणरावणचंडी
शनंदिभृंगिरिटादयः॥महेश्वरप्रसादोयंसर्वेगृण्हंतुशंभवाइत्यनेनमंत्रेणवाक्षिपेत्
इतिप्रसादंकृत्वाहस्तंप्रक्षालयेत्॥ततोंजलिनानैवेद्यपात्रंगृहीत्वामस्तकपर्यंतंनीत्वा
महाप्रसादइत्युक्त्वाशुचौदेशेस्थापयेत्।ततःपुनराच०गंडूषजलं।आचम०करोद्वर्त
नं।ततःमूलमंत्रेणतांबूलदक्षिणानीराजनंच॥नमोमहद्भ्यइत्यादिमंत्रैःत्र्यंबकंयजामहे
०नमस्तेअस्तुभगवन्।राजाधिराजाय०सद्योजातं०वामदेवाय०अघोरेभ्य०तत्पुरुषाय०ई
शानसर्व०एभिर्मंत्रैःॐनमःसांगायसपरिवारायदेवायपुष्पांजलिंस०देवस्यमूर्ध्निपुष्पां
जलिः।ततःसद्योजात०वामदेवाय०अघोरेभ्यः०तत्पुरुषाय०ईशानःसर्व०इतिपंचमंत्रान्
पठन्नमःशिवायप्रदक्षिणात्रयकरणं।एकांविनायकेकुर्याद्वेसूर्येत्रीणिशंकरे॥चत्वारि

केशवेकुर्यादष्टौगोर्य्याःप्रदक्षिणाः॥यानिकानि॰ऋतंचसत्यंच॰इत्यनेनयथाशक्तिसाष्ट॰
ष्टांगप्रणामः॥उरसाशिरसादृष्ट्यामनसावचसातथा॥पद्भ्यांकराभ्यांजानुभ्यांप्रणामोऽ
ष्टांगईरितः॥ततःस्तुतिः॥ॐनमोभगवतेसदाशिवायसकलतत्वात्मकायसकलतत्वविद्
रायसकललोकैककर्त्रेसकललोकैकभत्रेसकललोकैकगुरवेसकललोकैकसाक्षिणेसकल
निगमगुह्यायसकलवरप्रदायसकलदुरितविभंजनायसकलजगदभयंकरायसकललो
कैकशंकरायशशांकशेखरायशाश्वतनिजावासायनिर्गुणायनिरुपाय निराभासायनिःप्रप
ंचायनिःकलंकायनिर्द्वंद्वायनिःसंगायनिर्मलायनिर्गमायनिरुपमविभवायनिराधारायनि
रवद्यपरिपूर्णसच्चिदानंदद्वयपरशांत प्रकाशतेजोरूपाय॥ततःशिवस्मरणंकृत्वाइष्टमंत्रस्य
षडंगन्यासःध्यानंच।ततश्चंद्रमंडलोपरिबद्धपद्मासनंचंद्रवर्णममृतपूर्णचंद्रकलाधरं॥यो

गमुद्राधरममृतपूर्णकलशोभरहस्तहृदयंसोमसूर्याग्निलोचनं।बद्धपिंगजटाजूटंनानाभरणभू
षितं॥भक्तानुकंपितंश्रीमदुमयासहितंशिवमितिध्यानं।स्नेहपूर्णेनचित्तयेत्॥ॐमृत्युं
जयमहादेवत्राहिमांशरणागतंव्याधिमृत्यजरारोगैःपीडितंकर्मबंधनैः॥तावकस्त्वद्गतप्राण
स्त्वच्चित्तोहंसदामृड॥इतिविज्ञाप्यदेवेशंजपेन्मंत्रंन्यसेद्बकं॥पुनःषडंगन्यासपूर्वकोजपः॥
शरणंतरुणेंदुशेखरःशरणंमेगिरिराजकन्यका॥शरणंपुनरेवतावुभौशरणंनान्यमुपैतिदै
वतं॥ततःशक्त्यास्तोत्रपाठः॥यदक्षरंप॰नमःशिवायशांताय॰कायेनवा॰अपराधसह॰क्ष
तिक्षमापनं॥ततस्तीर्थग्रहणंकृत्वानिर्याणमुद्रया शिवनिर्माल्यंगृहीत्वादक्षिणनासावभ्राणंकृ
त्वाशिरसाधारयेत्॥उत्तिष्ठब्रह्मणस्पतइतिपीठावरणदेवतानामेवविसर्जनंकुर्यात्पश्चाज्जपज
यशब्दपूर्वकमिष्टदेवतास्मरणमुच्चैःकर्तव्यं॥इतिशिवपूजा॥

॥अथदुर्गापूजाप्रयोगः॥

५४

दीपस्थानांतंसूर्यपूजावत्कृत्वा ॐ दुर्गायैनमइतिमूलमंत्रषडक्षरैः षडंगन्यासः॥यथा।ॐ हृदया
५५ य० दुंशिरसे० र्गांशिखायै० यैकवचाय० नंनेत्रत्रयाय० मः अस्त्रायफट्। ततोर्घपात्रंजलेनापूर्यत
दुपरिहस्तंदत्वामूले नत्रिवारमभिमंत्र्यतेनोदकेनात्मानंपूजाद्रव्याणिपूजास्थानंमोक्ष्यगंधपु
ष्पाभ्यांदेवबुध्यात्मानमभ्यर्च्यदुर्गांध्यायेत्॥सिंहस्थाशशिशेखरामरकतप्रख्यैश्चतुर्भिर्भु
जैः शंखंचक्रधनुःशिरांसिदधतीनेत्रैस्त्रिभिःशोभिता॥आमुक्तांगदहारकंकणरणत्कांचीक्वणन्
पुरादुर्गादुर्गतिहारिणीभवतुनोरत्नोल्लसत्कुंडला इतिध्यात्वावाहनमुद्रांदर्शयेत्। यास्वांजलौपुष्पंगृहीत्वा
दुर्गायैनमः इतिउच्चार्यस्वस्थानात्सुषुम्नामार्गेणब्रह्मरंध्रद्वारानासिकारंध्रयागतांविचिंत्यततः ५५
स्वांजलिस्थपुष्पसंचयेसमागतांविचिंत्यदुर्गेइहागच्छ इहतिष्ठइहसन्निधेहिइहसन्निरुध्यस्व
ममपूजांगृहाणइत्युक्त्वांजलिस्थपुष्पाणिप्रतिमोपरिस्थापयेत्॥ततःआवाहनादिमुद्राप्रदर्शनं॥

ततःॐदुर्गायै० आसनं। प्रत्युपचारपुष्पं। गंधपुष्पोदकेनपाद्यं० पूर्ववदर्घं। आचम० ततःपूर्ववत्स्नानजलंदेव्यामूर्ध्निप्रक्षेपणं। पुनराच० वस्त्रेणदेवताशरीरंमोंछ्याप्राधान्यंचेन्मध्येस्थापयेत्। इतरमाधान्येआग्नेयां॥ततोदुर्गायै० इदंवस्त्रं। आचम० ॐदुर्गायै० यज्ञोपवी० आच० वस्त्रादीनामग्नावेमंत्रंपठित्वा पुष्पाक्षतं। ततोदक्षिणकनिष्ठिकयागंधंगृहीत्वा दुर्गायै० गंधं स० गंधमुद्राप्रदर्शनं। ततःदुर्गायैपुष्पं। वारंवारमुत्तानपुष्पसमर्पणं। पुष्पमुद्राप्रदर्शनं॥ ततःधूपपात्रेधूपप्रक्षेपणंतंकृत्वा ॐदुर्गायै० इतिशंखजलमुत्सृज्यपुष्पंदत्वाधूपमुद्रांप्रदर्श्यपूजितांघंटांवामहस्तेनवादयन्जय२ दुर्गेमहामहिषमर्दिनिजय२ ब्रह्मादिग्राहितशरीरंजय२ विश्वेश्वरिविश्वपरिपालिकेजय२ त्रैलोक्यवंदितेइतिगुणनामानिकीर्तयन्देवींधूपयेत्। ततःपूर्ववद्दीपंप्रज्वाल्यदीपपात्रमभ्यर्च्यवाममध्यमयास्पृशन्ॐदु० दीपंस०

शंखजलमुत्सृज्यदीपमुद्रांप्रदर्श्यपुष्पांजलिंदत्त्वावामहस्तेनघंटांवादयन्जय२मातस्त्रैलोक्य
परित्राणपरायणेजय२सकलदुरितनि२वारणसमर्थेजय२त्रैलोक्यवंदितचरणारवि
दइतिपठन्दक्षिणहस्तगृहीतप्रदीपेनपूर्ववद्देवींनिराजयेत्।ततःशुद्धपात्रेयथासं
भवंनैवेद्यंगृहीत्वाॐदुर्गा०इतिमत्सवारंमोस्यधेनुमुद्रांप्रदर्श्यवामांगुष्ठेनस्पृशन्दुर्गा
यैसा०स०नैवेद्यंस०शंखजलमुत्सृज्यपुष्पंदत्त्वावामहस्तेनघंटावादयन्दक्षिणहस्ते
नग्रासमुद्रांप्रदर्शयेत्॥जय२परमेश्वरिमहामायेजय२हिमाद्रितनयेजय२सक
लसुरार्त्तिदुर्द्धरणसमर्थेजय२सकलजनशिरःशेखरीकृतचरणसरोजरजःपुंजेद्र
स्याद्यतिशयजयाशंसनंकुर्यात्॥ततोनैवेद्याष्टतांशंगृहीत्वातीर्थकूर्चंकृत्वाउछि
ष्टचांडाल्यैनमइतिदेव्याःवामभागेप्रक्षिपेत्॥ततोंजलिनानैवेद्यपात्रंगृहीत्वामस्त

कपर्यंतंनीत्वामहाप्रसादइत्युक्त्वाशुद्धदेशेस्थापयेत्॥ततोगंडूषजलदानं।ततः आ
च०ततःपुष्पांजलिंगृहीत्वाॐदुर्गा०इतिपुष्पांजलिः॥ततःएकाप्रदक्षिणा।ततो
यथाशक्तिदंडवत्प्रणामाः ततःयथाशक्तिस्तुतिःततस्तांबूलदानं॥गीतवाद्यन्
त्यछत्रचामरादर्शदर्शनानियथेष्टंयथासंभवंमनुष्ठेयानि॥अज्ञानादथवाज्ञानादशु
भंयन्मयाकृतं।क्षंतुमर्हसितत्सर्वदास्येनत्वंगृहाणमां॥ततःॐदु०भगवतिदुर्गेसम
स्वेतिविसर्जनं।आवाहनंविसर्जनंचास्थिरतयाकार्यं॥इतिदुर्गापूजा॥ ॥अथ
पंचमहायज्ञाः।तथाचोद्दाहानंतरंसंवर्तः।ततःपंचमहायज्ञान्कुर्यादरेहेद्विजः।
नहापयेत्तुतात्साक्षात्श्रूयंतेहिश्रुताविति॥तथाचशंखपथश्रुतिः॥पंचैवमहायज्ञान्ये
न्येवमहासत्त्राणीत्यादितस्मात्स्वाध्यायोध्येतव्यइत्यंतं।तथाचपारस्करः।अहरहःस्वा

२हाकुर्यादन्नाभावेकेनचिदाकाष्ठादितिमनुः॥पंचसुनागृहस्थस्यचुल्लीपेषण्युपस्कारः।कंडनीचोदकुंभश्चबध्येतेयास्तुवाहयन्। तासांक्रमेणपंचानांनिष्कृत्यर्थंमहर्षिभिः। पंचक्लृप्तामहायज्ञाःप्रत्यहंगृहमेधिनां।अध्ययनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणं। होमोदैवोबलिर्भौतोनृयज्ञोतिथिपूजनं॥अकृतेवैश्वदेवेतुयेभुंजंतेद्विजातयः॥वृथा तेनान्नपाकेनकाकयोनिंव्रजंतिते॥अकृतेवैश्वदेवेतुयोभुंक्तेनापरिद्विजः॥समूढो नरकंयातिकालसूत्रमवाक्शिराइतिदोषश्रवणात्॥ततोवैश्वदेवार्थमन्नंघृतयुक्तंवा पिगंधपुष्पाणिचोपादायपश्चादग्नेः प्राङ्मुखउपविश्यहुतवहंसमृद्धंविधायदर्भपाणिद्विरान्वम्यबद्धशिखीप्राणानायम्यसंकल्पममपुरुषसंस्कारान्नसंस्कारद्वारापरमेश्वरप्रीत्यर्थंवैश्वदेवेनयक्ष्येइतिसंकल्प्य।ततोदेवताभिध्यानं॥देवतानामभिध्यानंनक ५७

रोतिविमूढधीः॥कथातस्यभवेत्कर्मइतिवेदविदोविदुः॥तद्यथा॥ब्रह्माणंप्रजापतिंगृह्यंकश्यपमनुमतिमेतान्देवयज्ञेनपर्जन्यमद्भ्यःपृथिवींधातारंविधातारंवायुंवायुंवायुंवायुंप्राचींदिशंदक्षिणांदिशंप्रतीचींदिशंउदीचींदिशंब्रह्माणमंतरिक्षंसूर्यंविश्वान्देवान्विश्वान्भूतान्उषसंभूतानांचपतिंपितॄन्बलियज्ञेनयक्ष्माणंवैश्वदेवान्नपात्रनिर्णेजनेनसनकादिमनुष्यान्हंतकारेणअमुकगोत्रान्अस्मत्पितृपितामहप्रपितामहान्अमुकामुकशर्मणः॥अमुकगोत्रान्अस्मन्मातामहप्रमातामहवृद्धप्रमातामहान्अमुकामुकशर्मणःअहंयक्ष्येइतिदेवताभिध्यानं।विधायगंधपुष्पैर्बर्हिरग्निमभ्यर्च्यमण्डलेनाग्निंपर्युक्ष्यदक्षिणंजान्वाच्यवामकरेणहृदयंस्पृशन्जुहुयात्॥ॐ ब्रह्मणेस्वाहा। इदंब्रह्मणेनमम।प्रजापतयेगृह्याभ्यःकश्यपायअनुमतयेइतिदेवयज्ञः।मणिकप

श्चिमभागेपाक्संस्थमुदक्संस्थं वाहुद्वयान्ते नवबलित्रयं।ॐपर्जन्याय०इदं०अग्नयो०पृथि
५८ व्यै०हारश्चारवयोर्दक्षिणोत्तरयोर्यथाक्रमं॥ॐधात्रे०इदं०ॐविधात्रे०प्रतिदिशंवायवेनमः४
इदंवायवे॥प्राच्यैदिशे०दक्षिणायैदिशे०प्रतीच्यैदिशे०उदीच्यैदिशे०दत्तानांबलीनामंतराले
।ब्रह्मणेनमःइदं०अंतरिक्षाय०सूर्याय०ब्रह्मादीनामुत्तरप्रदेशेॐविश्वेदेवेभ्योनमः
इदं०विश्वेभ्योभूतेभ्यो०तयोरुत्तरतःउषसेनमःइदं०भूतानांपतये०इतिभूतयज्ञः।ब्रह्मादी
नांदक्षिणप्रदेशेप्राचीनावीतिदक्षिणामुखःसव्यंजान्वाच्यपितृभ्यःस्वधानमइतिमंत्रेणैकं
बलिंपात्रावशिष्टान्नेनदद्यात्इदंपितृभ्यःइतिपितृयज्ञः॥ततःपात्रंप्रक्षाल्यनिर्णेजनजलं ५८
ब्रह्मादिबलीनांवायव्यादिद्युत्सृजेत्॥यस्मैनत्तेनिर्णेजनंनमःइदंय०ब्रह्मयज्ञसूक्तएव
॥ततःकाकादिबलीन्बहिर्दद्यात्॥तद्यथा।ऐंद्रवारुणवायव्याःसौम्यावैनैऋतास्तथा॥

वायसाःप्रतिगृण्हंतुभूमौपिंडंमयार्पितं।इदंवायसेभ्योनमम॥श्वानौद्वौश्यामशबलौ
वैवस्वतकुलोद्भवौ॥ताभ्यांपिंडंप्रदास्यामिस्यातामेनावहिंसकौ॥इदंश्वभ्यः।देवामनु
ष्याःपशवोवयांसिसिद्धाश्चयक्षोरगदैत्यसंघाः॥प्रेताःपिशाचास्तरवःसमस्तायेचान्नमि
च्छंतिमयाप्रदत्तं॥इदंदेवादिभ्योनमम॥पिपीलिकाःकीटपतंगकाद्याबुभुक्षिताःकर्मणि
बद्धबद्धाः॥तृप्त्यर्थमन्नंहिमयाप्रदत्तंतेषामिदंतेमुदिताभवंतु॥इदंपिपीलिकादिभ्यः॥
विष्णुपुराणे।गोदोहमात्रंनुतिष्ठेत्कालंगृहांगणे॥अतिथिग्रहणार्थायतदूर्ध्वंवायथेच्छया
॥अतिथिविषयेविशेषमाहवेयाघ्रपादः॥अध्वनीनमनाहूतंवैश्वदेवेप्युपस्थितं॥अ
तिथिंतंविजानीयान्नैकग्राम निवासिनं।पादौप्रक्षाल्याचम्यगोदोहमात्रंप्रतीक्ष्यातिथि
प्राप्तौपादप्रक्षालनपूर्वकगंधमाल्यादिभिरभ्यर्च्यअन्नंपरिवेष्यहंतेमनुष्यायेतिसंकल्प

तमाशयेत्तदभावेषोडशग्रासपरिमितंचतुर्ग्रासपरिमितंवान्नंपात्रेकृत्वानीवीतिभू
लोरज्जुखोपविष्टोहंतत्तेतिमनुष्यायेतिसंकल्प्यकस्मैचिद्ब्राह्मणायदद्यान्मनुष्ययज्ञसि
द्धये ॥ततोनित्यश्राद्धं ॥इत्याचारपद्धतौसाग्निकस्यवैश्वदेवः।तत्रवसिष्ठः॥अनग्निकस्तु
योविप्रःसोन्नंव्याहृतिभिःस्वयं॥हुत्वाशाकलमंत्रैस्तुशिष्टाद्भुक्तबलिंहरेत्॥अनग्निकःश्रौ
तस्मार्ताग्निरहितः।शाकलमंत्राः।ज्योतिष्टोमेयूपशाकलहोमेविनियुक्ताः॥देवकृतस्ये
नसोवयजनसीत्याद्याः।अग्निः।प्रजापतेःस्विष्टकृतःपत्नीनामाहुतिद्वयं॥हुतशेषान्न
तोदेयोबलीभोक्तिकपैतृको॥तथाचशंखः॥अन्नंव्याहृतिभिर्हुत्वातथामंत्रैस्तुशाक ५९
लैः॥अन्विभज्यचभूतेभ्यस्ततोश्नीयादनग्निमान्॥व्यासः।शाकलेनविधानेनजुहुया
द्यौकिकेनले।व्यस्ताभिर्व्याहृतिभिस्तुसमस्ताभिस्ततोपरं॥षड्भिर्देवकृतस्येतिमंत्रवद्वि

र्यथाक्रमं॥प्राजापत्यंस्विष्टकृतंहुत्वैवंद्वादशाहुतीः॥ॐकारपूर्वःस्वाहांतेत्यागःस्विष्टकृ
द्विधानतः॥भुविदर्भानूस्तमास्तीर्यबलिकर्मसमारभेत्॥विश्वेभ्योदेवेभ्यइतिसर्वेभ्यो
भूतेभ्यएव॥भूतानांपतयेचेतिनमस्कारेणशाकलंवित्॥दद्याद्बलित्रयंचाग्नेपितृभ्यश्च
स्वधानमः॥पात्रनिर्णेजनंवारिवायव्यांदिशिनिक्षिपेत्।उच्छ्रित्यषोडशग्रासमात्रमन्नं
घृतोक्षितं॥इहमन्नंमनुष्येभ्योहंतेत्युत्कासमुत्सृजेत्॥गोत्रनामस्वधाकारैःपितृ
भ्यश्चापिशाकिनः।षड्भोन्नमन्वहंदद्यात्पितृयज्ञविधानइति॥विष्णुरपि॥अन्नंव्याहृ
तिभिर्हुत्वामंत्रैर्हुत्वाथशाकलैः॥प्रजापतिंहविर्हुत्वापूजयेदतिथिंततः॥छंदोगपरि
शिष्टेकात्यायनः॥अग्न्यादिगौतमेनोक्तोहोमःशाकलएवच॥अनाहिताग्नेरप्येष
युज्यतेबलिभिःसहेत्यादिवाक्यैर्निरग्नेःप्रकारांतरेप्यविधानात्॥नचछंदोगपरिशिष्ट

मेवनिरग्निछंदोगपरं। सर्वशाखाप्रत्ययमेकंकर्मेतिन्यायेनास्यसर्वार्थत्वात्॥ मणिकेत्वी
नीतिश्रवणान्निरग्नेश्चमणिकाभावात्साग्निविषयत्वं॥ श्रुतिद्वैधंतुयत्रस्यात्तत्रधर्मावु
भौस्मृतौ॥ स्मृतिद्वैधेतुविषयःकल्पनीयःपृथक्पृथक्इतिवचनादत्रस्मृतिविप्रतिप
त्तेविषयकल्पनमेवोचितंनत्वेकतरपक्षात्प्रायेणसिद्धांतकरणं॥ स्मार्तसूत्रस्यापिस्मृतिम्
लत्वात्। यद्वा। स्वशाखाध्ययमुत्सृज्यपरशाखाध्ययंचयः॥ कर्तुमिच्छतिदुर्मेधामोघंतत्तस्यचे
ष्टितं। यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत्॥ विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिक
र्मवत्॥ बह्वल्पंवास्वगृह्योक्तंयस्ययावत्प्रकीर्तितः॥ तस्यतावतिशास्त्रार्थेकृतेसर्वःकृतो
भवेदित्यादिवचनैर्विशेषविधानाच्च। तस्मान्निरग्निवाजसनीयोपिस्वगृह्योक्तएवकल्प
इति॥ दाक्षिणात्यवाजसनेयिनस्तु नियमपक्षंमाध्युपगच्छति। तेषामयमाशयः। यद्यपि

गृह्योक्तत्वान्माणिकाहुतिपरिशिष्टाच्चनगृह्योक्तप्रकारेगृह्याग्निनिय
मस्तथापिअनग्निकस्तुयोविप्रः सोन्नंव्याहृतिभिःस्वयं॥ हुत्वाशाकलमंत्रैस्तुशिष्टाद्
तबलिंहरेत्॥ तथा॥ अन्नंव्याहृतिभिर्हुत्वातथा व्यासः॥ शाकलेनविधानेनजुहुयाल्लौ
किकेनले व्यस्ताभिर्व्याहृतिभिस्तुसमस्ताभिस्ततःपरं॥ षड्भिरेवकृतस्येतिमंत्रवद्वैर्यथाक्र
ममपीत्यादिवशिष्टशंखव्यासादिवचनेभ्यः प्रातिस्विकगृह्यरहितपुरुषाभावेनचनाना
स्मृतिपुराणोक्तगृह्यविलक्षणप्रकारस्यानर्थक्यपक्षेसिध्यतिनियमः तस्मान्निरग्नीनांव
चनात्शाकलएव। नहिवचनप्राप्तिन्यायसहस्रेणापिपराकर्तुंशक्यं॥ नास्तिवचनस्य
किंचिदुद्धरं॥ तत्रैयंव्यवस्थासाग्नीनांसौत्रोवैश्वदेवः। निरग्नीनांस्मृत्युक्तइतितस्मात्का
तीयगृह्योक्तस्कगृह्याग्निमतेवतत्रैवकार्यः तदितरेणतुयत्किंचिच्छ्रुतिपुराणोक्तौलौकि

काग्नाविति॥अथप्रयोगः॥ ॥स्थंडिलेपंचभूसंस्कारान्कृत्वातत्राग्निंसंस्थाप्यवैश्वदेवार्थं
मन्नंघृतयुक्तंवारिचारायपूर्ववत्संकल्पगंधादिनाबहिरग्नेःपूजनं॥मुखंवयःसर्वदेवानांह
व्यभुक्कव्यभुक्तथा॥पितॄणांचनमस्तस्मैविघ्नेपावकात्मने॥चत्वारिशृंगा०दृष्टोदेवि०
॥एषोहदेवः०॥उदकेनाग्निंपर्युक्ष्यदक्षिणंजान्वाच्यवामकरेणहृदयंस्पृशन्जुहुयात्
॥भूरादिमहाव्याहृतीनांप्रजापतिऋ०गायत्र्युष्णिगनुष्टुप्छंदांस्यग्निवायुसूर्योदेव
ताहोमेविनियोगः॥भूःस्वाहा॥इदमग्नये॥भुवःस्वाहाइदंवायवे॥स्वःस्वाहाइदंसूर्यायं०भू
र्भुवःस्वःस्वाहाइदंप्रजापतयेनमम॥देवकृतस्येत्यादिषण्णांयजुषांप्रजापतिऋ०यजु०अ
ग्निर्दे०शाकलहोमे०देवकृतस्यैनसोवयजनमसिस्वाहा॥इदमग्नये०॥मनुष्यकृतस्यैनसो
वयजनमसिस्वाहा॥इदम०॥पितृकृतस्यैनसोवयजनमसिस्वाहा॥इदम०आत्मकृतस्यैन

सोवयजनमसिस्वाहा॥इदम०॥एनसःएनसोवयजनमसिस्वाहा॥इदम०यच्चाहमेनोविद्वां
श्चकारयच्चाविद्वांस्तस्यसर्वस्यैनसोवयजनमसिस्वाहा॥इदम०प्रजापतयेस्वाहा॥इदं०अ
ग्नयेस्विष्टकृतेस्वाहा॥इदं०॥ततोग्नेःपश्चात्प्राग्ग्रदर्भास्तरणं॥दर्भोपरिविश्वेभ्योदेवे
भ्योनमः॥इदं०सर्वेभ्योभूतेभ्योनम॥इदंस०॥भूतानांपतयेनमः॥इदंभू०॥बलित्रयस्यद
क्षिणेदक्षिणाग्रदर्भास्तरणं॥अपसव्यंदक्षिणामुखःसव्यंजान्वाच्यदक्षिणाग्रदर्भोपरि
पितृभ्यःस्वधानमःइदंपि०बलित्रयावशिष्टान्नस्यपिंडंकृत्वापितृतीर्थेनदाने॥सव्यं
कृत्वापात्रेप्रक्षाल्यनिर्णेजनजलंबलीनांवायव्यांदिश्युत्सृजेत्॥यस्मैतन्नेनिर्णेजनं०इदंय०
हुतशेषमन्नमाराय॥गवेपूर्ववत्बलिदानंवायसादिभ्यः॥पादौप्रक्षाल्याचम्यगृहमाविश्य
गोदोहकालमात्रंप्रतीक्ष्योदङ्मुखउपविश्यनिवीती॥अतिथिप्राप्तौपादप्रक्षालनपूर्वकं

धादिभिरभ्यर्चापरिवेष्यहंतत्तेन्नंमनुष्यायेतितमाज्ञापयेत्।इदंमनकादिमनुष्येभ्योनमः॥
अतिथेरभावेषोडशग्रासपरिमितमन्नंपात्रेकृत्वाहंतत्तेन्नंमनुष्यायेतिसंकल्प्यकस्मैचि
द्ब्राह्मणायदद्यात्।एकस्मिन्पात्रेगोग्रासंगृहीत्वागोपूजनंकंडूयनंचकृत्वा।सौरभेय्यः
सर्वहिताःपवित्राःपुण्यराशयः॥प्रतिगृण्हंतुमेग्रासंगोवस्त्रैलोक्यमातरइत्यनेनगोग्रा
सदानं॥वैश्वदेवाकरणेप्रायश्चित्तंप्रायश्चित्तकांडे।पंचानामपियज्ञानामेकैकाकरणेनै
रः।उपवासंप्रकुर्वीतसावित्रीजपमेवच॥अष्टोत्तरसहस्रंतुपुनःपूतोभवेन्नरः।इत्य
चारपद्धतौनिरग्निकवैश्वदेवविधिः॥अथनित्यश्राद्धं॥नित्यश्राद्धप्रकारोमत्स्यपुरा
णेदर्शितः॥नित्यंतावत्प्रवक्ष्यामिअर्घ्यावाहनवर्जितं॥अदैवंतद्धिजानीयात्सार्वर्णंतद्धि
कीर्तितमिति॥प्रचेताः।नावाहनाग्नौकरणंनपिंडोनविसर्जनमिति॥व्यासोपि॥नित्यश्रा

MEMORIAL

द्धेयगंधाद्यैर्द्विजान्पूर्व्वमर्चयेत्।सर्वान्पितृगणान्सम्यक्सहैवोद्दिश्यभोजयेत्॥आ
वाहनंस्वधाकारंनानुव्रज्यजपादिकं॥ब्रह्मचर्यादिनियमोवैश्वदेवास्तथैवच॥नित्य
श्राद्धेत्यजेदेतान्भोज्यमन्नंप्रकल्पयेत्॥दत्वातुदक्षिणांशक्त्यानमस्कारैर्विसर्जयेत्॥
नित्यश्राद्धेतथादर्शेमन्वादौसंक्रमेतथा॥युगादौचविशेषेणश्राद्धंषाट्पौरुषंवि
दुः॥एकमप्याशयेद्यन्नंषण्णामप्यन्वहंगृहीति॥एकमप्याशयेन्नित्यंपितृयज्ञार्थ
सिद्धये॥अदैवंनास्तिचेदन्योभोक्ताभोज्यमथापिवा॥अभ्युदयेययथाशक्तिकिं
चिदन्नंसमाहितः॥वेदतत्त्वार्थविदुषेब्राह्मणायोपपादयेत्॥कुर्यादहरहःश्राद्ध
मन्नाद्येनोदकेनवा॥पितॄनुद्दिश्यविप्रांस्तुभोजयेद्घृतमेववा॥नामन्त्रणंनहोमं
चनात्रानंनविसर्जनं।नपिंडदानंविकरंनदर्याद्यत्रदक्षिणां॥दक्षिणायास्तुविहित

प्रतिषिद्धत्वाद्विकल्पः। षोडशीग्रहणाग्रहणवत्॥ नित्यश्राद्धंनकुर्वीतप्रसंगाद्यत्रसिध्य
६३ ति॥ श्राद्धांतरेकृतेन्यत्रनित्यत्वान्नन्हापयेत्॥ यत्रषडभ्योदत्तंतत्रप्रसंसिद्धिः। यत्रन्यूने
ष्यस्तत्रावृत्तिः। पश्वर्थानुष्ठितप्रयाजेः पशुपुरोडाशप्रयाजानांयथा॥ काम्याग्निहोत्रे
णनित्यस्य॥ अथप्रयोगः॥ ॥स्वागतवचनेनब्राह्मणान्दैवेवाएकंवाभ्यर्च्य। श्र
न्नोदेवी॰ अमुकगोत्राः अमुकशर्माणः अस्मत्पितृपितामहप्रपितामहाः वसुरुद्रादि
त्यस्वरूपाः इदंवः पाद्यंस्वधा। पाद्यस्थानेएषतेर्घः स्वधा॥ एवमेवमातामहब्राह्मणानां
पादप्रक्षालनं। ततोचम्यगृहंप्रविश्यगृहाभ्यांतरेदक्षिणाग्रास्तृतकुशासनेषुस
मुपवेश्यस्वयमाचम्योपविश्यश्रीवासुदेवंसंस्मृत्यसावित्रींपठित्वाप्राणानायम्य ६३
देवताभ्यइतित्रिर्जपित्वा संकल्प्यमुच्चार्यप्राचीनावीतिदक्षिणामुखः सव्यंजान्वाच्य।

अमुकगोत्राणांअस्मत्पितृपि॰ नित्यश्राद्धमहंकरिष्येइतिसंकल्प्यद्विगुणितान्कुशानादाया
मुकगोत्रस्यामुकश॰ इदमासनं॥ एवंपितामहप्रपितामहानां। एकब्राह्मणपक्षेएकप्रयो
गेनासनदानं। एवंमातामहानामपि। ततोगंधादिकंयथासंभवंदत्त्वाद्विगुणकुशजलान्या
दायामुकगोत्रेभ्योमुकशर्मभ्यः अस्मत्पितृ॰ गंधपुष्पधूपाछादनानि। एवंमातामहादीनां
। ततः पत्रावलींनिधायजलभस्मादिनाचतुरस्रादिमंडलेनवेष्टयित्वांश्राद्धार्थमन्नंव्यं
जनादिकंपरिवेष्यपात्रालंभनांगुष्ठावगाहनांतंकृत्वाअपहतेतिलानवकीर्योदकस्पृ
श्यवामकरेणपत्रावलिंदधानोदक्षिणेनसजलतिलकुशपत्रत्रयंगृहीत्वावामजान्वा
च्यामुकगोत्राः अ॰ एतद्वोन्नंदत्तंदास्यमानंचामृतरूपेणस्वधासंपद्यतां। इदंगो
त्रेभ्यः पि॰ एकब्राह्मणपक्षे॥ ब्राह्मणद्वयपक्षेपृथक्पृथक्त्रिकोच्चारणं। प्रतिव्यक्तिब्रा

लणपक्षेअमुकगोत्रःअस्मत्पितःअमुकशर्मन्नेतद्देवमन्नमुपनीतमुपवेष्यमाणंचात्मनः
स्वधानमःएवंपितृपितामहमातामहानां॥ततोऽग्नौसुपुरुषसूक्तंजपित्वाचमनंदत्वाथ
शक्तिरक्षिणयासंतोष्यप्रेषयेत्॥अत्रदेशकालनियमाःकर्तृभोक्तृनियमाश्चनभवंति॥
ओष्टैकृभोज्यान्नसंपन्नौउद्धृत्यान्नंयथाशक्तितःषोडाविभज्यमनसापितॄनुद्दिश्यतत्त्य
जेदितिनित्यश्राद्धं॥ब्रह्मयज्ञसूक्तएव॥इतिपंचमहायज्ञाः॥ ॥अथभोजनविधिः॥
ततोयथार्हमिक्षुकादिभ्योन्नंविभज्यबालज्येष्ठाश्रयथायोग्यमश्नीयुः॥ततोजायाप
तीआश्नीतः।पूर्ववागृहपतिः।पत्नीतोतिथ्यादीनाशयित्वाश्नीयात्॥बहिःपादप्रक्षालनं
हस्तौप्रक्षाल्याचम्यभोजनस्थानंप्रतिगछेत्॥ततःशुचौदेशेप्रक्षालितासनेप्राङ्मुखउ
दङ्मुखंवोपवेशनं।स्वपुरतोवारिणाचतुरस्रंमंडलंतत्रप्रक्षालितंकांस्यपात्राणिनिधाय

तत्रस्वस्त्यादिभिर्मंत्रैर्दक्षिणभागेपेयंलेह्यंचवामभागेपरिवेष्यांजलिंबध्वाऽस्माकंनि
त्यमेतदस्त्वितिनत्वाप्रणवव्याहृतिपूर्वकंगायत्र्यान्नमभ्युक्ष्य॥सत्यंत्वर्तेनपरिषिंचा
मीतिदिवा॥ऋतंत्वासत्येनपरिषिंचामीतिरात्रौ।प्रदक्षिणमन्नंपरिषिंच्यवामहस्ते
नपात्रमालभ्यपात्रदक्षिणभूमौउदकधारांकृत्वातत्रनमोतैःॐचित्रायनमः॥ॐचि
त्रगुप्तायनमः॥ॐसर्वेभ्योभूतेभ्योनमः।दिवाचरेभ्यइतिवा॥ॐयमायायमपुरुषा
यसर्वेभ्योभूतेभ्योनक्तंचरेभ्यइतिवारात्रौ॥आपोशानार्थंजलंगृहीत्वावामह
स्तमध्यमानाभिकांगुष्ठेभोजनपात्रमालभ्य॥अन्नंब्रह्मरसोविष्णुर्भोक्तादेवोमहेश्वरः॥
एवंध्यात्वातुयोभुंक्तेसोन्नदोषेर्नलिप्यते॥अंतश्चरतिभूतेषुगुहायांविश्वतोमुखः॥त्वं
यज्ञस्त्वंवषट्कारस्त्वंविष्णोःपरमंपदं॥ॐआपोज्योतिरसोमृतंब्रह्मभूर्भुवःस्वरोम्॥ॐ

अमृतोपस्तरणमसिस्वाहाइतिमंत्रेणनिःशब्दंतज्जलाचमनं॥तर्जनीमध्यमांगुष्ठैःॐ
प्राणायस्वाहा।मध्यमानामिकांगुष्ठैः।ॐअपानायस्वाहा।कनिष्ठिकानामिकांगुष्ठैः।
ॐव्यानायस्वाहा।मध्यमानामिकांगुष्ठैः ॐउदानायस्वाहा॥सर्वांगुलिः ॐसमाना
यस्वाहा॥यंत्रिकारौभोजनपात्रस्थापनं।पात्रहृयंभूमौप्रतिष्ठाप्यभोजनपात्रम
परित्यजन्पूर्वंमधुरद्रव्यान्नभोजनमध्येलवणाम्लकटिणान्नभोजनंअंतेकटुतिक्त
द्रव्यान्नभोजनंकिंचिदनूत्संभोजनसमाप्तिः॥पयोदधिसक्तुमधुपायसवर्ज्यंसर्वस्य
भस्यकिंचिदमुक्तशेषं॥भोजनपात्रस्यभूमौस्थापनं॥दक्षिणहस्तेनावघ्रिष्टान्ना
त्सर्वस्माकिंचित्आदायाघ्रायसोदकमुच्छिष्टभागधेयेभ्योभूमौत्यक्त्वोत्तरापोशना
र्थमप्रक्षालितएवपाणावुदकंगृहीत्वाः मृतापिधानमसिस्वाहेतिमंत्रेणतदर्धंपीत्वा॥

रौरवेपूपनिलयेपद्मार्बुदनिवासिनां॥अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतितिमंत्रेणा
वशिष्टंपितृतीर्थेनभूमौनिषिंच्यतत्रैवपात्रांतरेआचम्योत्थायस्वासनेउपविश्य॥
अगस्तिरग्निर्वडवानलश्चभुक्तंममान्नंजरयत्वशेषं॥सुखंममेतत्परिणामसंभवंय
त्वरोगंममचास्तुदेहेइतिमंत्रेणोदरंपरिमृज्यतांबूलंभक्षयित्वापुराणश्रवणादिभि
र्दिनशेषमतिवाह्यास्तमयात्पूर्वमेवशौचादिनियमपूर्वंसायंसंध्यावंदनमारभेत्॥
आचम्यसायंसंध्योपासनमहंकरिष्ये।अथावाहनं॥वृद्धांसरस्वतींकृष्णांपीतवस्त्रां
चतुर्भुजां॥शंखचक्रगदापद्महस्तांगरुडवाहनां॥आवाहयाम्यहंदेवीमायांतीसूर्यमं
डलात्॥आगच्छवरदेदेवित्र्यक्षरेब्रह्मवादिनि॥सरस्वतिछंदसांमातर्विष्णुयोनेनमोस्तु
ते॥अग्निश्चमेतिनारायणऋषिःत्रिष्टुप्छंदःअग्निर्देवता।अंबुप्राशनेवि०।अग्निश्चमाम

न्युश्चमन्युपतयश्चमन्युकृतेभ्यपापेभ्योरक्षंतांयदह्नापापमकार्षमनसावाचाहस्ताभ्यां
पद्भ्यामुदरेणशिश्नाअहस्तदवलुंपतुयत्किंचिदुरितंमयिइदमहममृतयोनौसत्येज्यो
तिषिजुहोमिस्वाहा॥सायंनूपविशान्मुदीतिवचनादुपविश्येवसूर्यायार्घत्रयंदद्यात्ओं
अस्त्रोपसंहरणमंत्रस्यसवितुर्भार्गवऋषिः बृहद्गायत्रीछंदः परमात्मादेवतातुरीयंबीजं
अस्त्रोपसंहरणेवि०ॐआपःअंगुष्ठाभ्यां०ॐ ज्योतिस्तर्जनी०ॐ रसोमध्यमाभ्यां०ॐ
अमृतमनामिकाभ्यां०ॐ ब्रह्मकनिष्ठिकाभ्यां०ॐ भूर्भुवःस्वःकरतलकरपृष्ठाभ्यां०ॐ
अग्नयेहृदयाय०वायवेशिरसेस्वाहाॐसूर्यायशिखा०ॐ ब्रह्मणेकव०विष्णवेनेत्रत्र
ॐरुद्रायास्त्रायफट्॥यद्देवासुरपूजितारुणनिभंसामर्थतारात्मकंपुन्नागांबुजनाग
पुष्पबकुलैःकाशैःकुशैरान्वितं।नित्यंध्यानसमस्तरोसिकरणंकालाग्निरुद्रोपमंत

डाक्टर भाऊदाजी लाड पुरस्कार संग्रहालय
MEMORIAL
Dr. BHAU DAJI LAD

त्संहारकरंनमामिसततंपातालसंस्थंमुखं॥सोहमेकमहंज्योतिरर्कंज्योतिरहंशिवः॥आ
त्मज्योतिरहंशुक्रः सर्वज्योतिरसोहमोम्॥ॐओजोसिसावदों॥ॐधाम्नोराजन्नितिमंत्रः
॥अवायव्यमावायव्यं॥ॐवाययावा हरोसिपाप्मानंविद्धिएंसूर्यायनमः। ब्रह्मण्यशाश्वते
कर्मदायिनेविद्युसेविने॥जगत्प्रसूतिविमलेसवित्रेभास्वतेनमः॥ॐनारायणायविद्महे
वासुदेवायधीमहि॥तन्नोविष्णुःप्रचोदयात्॥अहोमहान्बहुरूपारिसव्येसंध्येसरस्व
ति॥अजरेअमरेचैवब्रह्मयोनेनमोस्तुतेइत्युक्त्वायोनिमुद्रांप्रदर्श्यवशिष्ठशापात्त्वंमुक्ता
भवेत्यस्त्रोपसंहरणं॥एवमेवप्रातःसंध्यायामपिकर्तव्यं॥ततःउद्वयमित्यादिसमानं॥जप
न्नासीतसावित्रींप्रत्यगानारकोरयादितिवचनात्सश्रिमाभिमुखेनैवजपःकर्तव्यःअनेना
ष्टोत्तरशतसंख्याकेनसायंसंध्यांगभूतेनश्रीमहाविष्णुस्वरूपीसवितासूर्यःप्रीयतांनमम॥

अन्यत्सर्वंसमानं॥इत्थंसायंसंध्यामुपास्यास्तमयात्पूर्वं भादुःकृतेग्नौसायंहोमंकुर्यात्॥तद्य
था॥अग्नेःपश्चात्प्राङ्मुख उपविश्यउपयमनकुशान्समिधःस्रिस्रःपालाश्यः व्रीहियवा
दिहोमद्रव्यंअग्नेरुत्तरतःप्राञ्चमासाद्य प्राणानायम्यपूर्वोक्तंसंकल्पमुच्चार्यश्रीपरमे
श्वरप्रीत्यर्थंसायंहोममहंकरिष्येइतिसंकल्प्य॥अग्नयेप्रजापतयेइत्यनयोर्मंत्रयोःआपो
मेधाऋषयः गायत्रत्रनुष्टुभौछंदसी क्रमेणाग्निप्रजापतीदेवतेसायंहोमेवि॰तत्राग्निंप्र
जापतिंतंडुलैर्यवैर्वायश्येइतिसंकल्प्योपयमनकुशानादायतिष्ठत्समिधोप्याधाय॥उक्तदके
नाग्निंपर्युक्ष्यदक्षिणंजान्वाच्यहृदिसव्यहस्तंप्रसारितांगुलिंनिधायद्वादशपर्वपूरकेणनंदु
लयवानामेकनमेनहस्तेनैवस्वंगायिणिस्वर्चिषिवन्हौमध्यप्रदेशेदेवतांध्याय न्जुहुयात्
॥ॐअग्नयेस्वाहाइदम॰नदुत्तरतःप्रजापतयेस्वाहाइदंप्र॰॥समास्त्वेतिनवर्चस्याग्निऋषिः

त्रिष्टु॰अग्निर्दे॰अस्युपस्थानेवि॰ॐसमास्त्वा॰ शरदीभिःइतिनवर्चस्यजपः॥ततोनमस्का
रःविभूतिवंदनं॥इतिहोमः॥ततःशिवपूजनं॥उपास्यपश्चिमांसंध्यांहुत्वाग्निंस्नानुपास्य
च॥योनपूजयतेनित्यंलिंगंत्रिभुवनेश्वरं॥नासौस्वर्गस्यमोक्षस्यनचराज्यस्यभाजनं॥
ब्रह्मोत्तरखंडे॥महाप्रदोषवेलासुशिवपूजांविमुक्तिदां॥शिवपूजांसदाकुर्याद्बुद्धि
मानिहमानवः॥अशक्तश्चेत्कृतांपूजांपश्येद्भक्तिविनम्रधीः॥अश्रद्धयापियःकुर्याच्छि
वपूजांविमुक्तिदां॥पश्येद्वासोपिकालेनप्रयातिपरमंपदमिति॥प्रातःकालेशिवंदृष्ट्वानि
शिपापंव्यपोहति॥आजन्मार्जितंमध्यान्हेसप्तजन्मार्जितंनरीतिपुराणवचनान्नि
शियथाशक्तिशिवपूजनंदर्शनंवाकुर्यात्॥ततःभानुवारपर्वसंक्रांतिव्यतीपातवैध
तिश्राद्धदिनतत्पूर्वदिनातिरिक्तदिनरात्रिषुपूर्वोक्तनियमेनलघुद्वितीयभोजनंकृत्वा

र्धयाममात्रंस्थित्वाशयनगृहंगत्वास्तीर्णशय्यायां॥सुत्रामाणमितिपठनुपविश्यनमोदायै
नमःप्रातर्नमोरायेनमोनिशि॥नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः॥जरत्कारोजरत्कार्पी
समुत्पन्नोमहायशाः॥आस्तिकःसत्यसंधोमांपन्नगेभ्योभिरक्षतु॥अगस्तिर्माधवश्चैव
मुचकुंदोमहाबलः॥कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः इतिमंत्रान्जपित्वाप्राक्
शिरादक्षिणाननएकाकीस्वपेत्॥ततोमध्यरात्रेशय्यां॥नरेस्वस्त्रियमृतुदर्शनमारभ्या
द्यदिनचतुष्टयैकादशत्रयोदशादिनातिरिक्तेषोडशादिनमध्येचतुर्थ्यष्टम्यष्टमीचतुर्द
शीपंचदशीश्राद्धतत्पूर्वव्रतोपवासदिनश्राद्धनिमंत्रितदिनतदुक्तदिनशनिरविभौमवा
रभरणीकृत्तिकार्द्रामघापूर्वाफाल्गुनीविशाखा॥ज्येष्ठामूलपूर्वाषाढापूर्वाभाद्रपदा
त्रिजन्मनक्षत्रंसंक्रांतिव्यतीपातवैधृतियोगव्यतिरिक्तदिनेषुपुत्रार्थीयुग्मदिनेक

न्यार्थ्ययुग्मदिनेउपवीतीसकुटुंबेत्यस्त्रियंनिरीक्षनुस्नायमूत्रशौचात्पूर्ववन्त्रिगुणंच पूर्ववच्छौ
चंकृत्वापाणिपादौप्रक्षाल्यद्विराचम्यस्नायात्॥अनृतावप्यनिषिद्धदिनेपत्नीछायापृष्ठ
तःकृतोपवीतउपगम्यस्नानवर्जंसर्वंकुर्यात्॥ततःस्वाचांतेनवध्वादक्षिणस्कंधस्योपरि
स्वकीयंदक्षिणंहस्तंनीत्वावध्वाहृदयमालभते॥यत्तेसुसीमेहृदयस्यप्रजापति॰ अनुष्टु॰ हृ
दयंते॰ हृदयालंभनेवि॰ ॐयत्तेसुसीमेहृदयंदिविचंद्रमसिश्रितं॥वेदोहंतन्मांतद्विद्यात्सश्ये
मशरदः शतंजीवेमशरदः शत ६॰ शृणुयामशरदः शतमित्यनेनमंत्रेण॥एवंसर्वदागम
नेषुएवंतनऊर्ध्वमितिवचनात्॥मनःप्रबोधकालपर्यंतंपुनःपूर्वशय्यायांयथासुखंस्वपेत्
॥इदंप्रभातोत्थानादिप्रतिदिनंकार्यं॥ ॥इतियथामतिवैदिकतुष्टयेग्रथितंकर्माह्निकमा
करदर्शनात्॥भवतुभक्तजनप्रियपार्वतीरमणशोणपदांबुजपूजनं॥१॥सदाशिवतनूजेन

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

काशीदीक्षितयज्वना॥ वीरेश्वरपदांभोजभ्रमरानूचितमौलिना॥२॥ इतिश्रीसदाशिवदीक्षित

सुतयाज्ञिककाशीदीक्षितवर्णितान्हिकप्रयोगः समाप्तिमगमत्॥ ॥शुभंभवतुसर्वदा॥